ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ॥ १८ ॥
yajñena yajñam ayajanta devāḥ । tāni dharmāṇi prathamā-nyāsan ।
te ha nākaṁ mahimānas sacante । yatra pūrve sādhyās santi devāḥ ॥ 18 ॥
The gods sacrificed through sacrifice, thus were the first ordinances established. Those great Beings who base their lives upon sacrifice verily reaches the highest Spiritual Realm where all the sādhyas (nitya sūris) dwell.

अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि ।
तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे ॥ १९ ॥
adbhyas saṁbhūtaḥ pṛthivyai rasācca । viśvakarmaṇas samavartatādhi ।
tasya tvaṣṭā vidadhad rūpam-eti । tat puruṣasya viśvam ājānam agre ॥ 19 ॥
In the beginning this universe arose from Vishvakarma [the Universal Architect] through water, earth, fire and the other elements. He excelled Aditya, Indra and the other gods. Fashioning the form thereof Tvashta proceeded, thus was the universe created in the beginning from the Primeval Being.

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् ।
तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेयनाय ॥ २० ॥
vedāham etaṁ puruṣaṁ mahāntam । āditya varṇaṁ tamasaḥ parastāt ।
tam evaṁ vidvān amṛta iha bhavati । nānyaḥ panthā vidyate'yanāya ॥ 20 ॥
I know this mighty Supreme Being whose splendour is like the sun, beyond the reach of darkness.
He alone who knows Him becomes immortal here, there is no other path to liberation.

प्रजापतिश्चरति गर्भे अन्तः । अजायमनो बहुधा विजायते ।
तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेदसः ॥ २१ ॥
prajāpatiś carati garbhe antaḥ । ajāyamāno bahudhā vijāyate ।
tasya dhīrāḥ parijānanti yonim । marīcīnāṁ padam icchanti vedhasaḥ ॥ 21 ॥
In the womb moves Prajapati [the Lord of Creatures], He never becoming born is manifested in variegated forms. The wise discern the Source from whence He arises, the first patriarchs sought the position which Marici and the others had obtained.

यो देवेभ्य आतपति । यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये ॥ २२ ॥
yo devebhya ātapati । yo devānāṁ purohitaḥ ।
purvo yo devebhyo jātaḥ । namo rucāya brāhmaye ॥ 22 ॥
He who gives light and heat to the gods, the First, Foremost agent of the gods.
To Him, to the Resplendent, to the Holy One salutations be.

रुचं ब्राह्मम्जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन्वशे ॥२३ ॥
rucaṁ brāhmaṁ janayantaḥ । devā agre tad abruvan ।
yas tvaivaṁ brāhmaṇo vidyāt । tasya devā asan vaśe ॥ 23 ॥
Thus spake the gods at first, as they begat the Bright and Holy One;
The brahmin who may know you thus, shall obtain dominion over all the gods.

ह्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्यौ॑ । अ॒हो॒रा॒त्रे पा॒र्श्वे । नक्ष॑त्राणि रू॒पम् ।
अ॒श्विनौ॒ व्यात्त॑म् । इ॒ष्टम्म॑निषाण । अ॒मुं म॑निषाण । सर्व॑म् मनिषाण ॥ २४ ॥
hrīś ca॑ te la॒kṣmīś ca॒ patnyau॑ । a॒ho॒ rā॒tre pā॒rśve । nakṣa॑trāṇi rū॒pam ।
a॒śvinau॒ vyā॒ttam॑ । i॒ṣṭam॑ mani॒ṣā॒ṇa । a॒mum॑ mani॒ṣā॒ṇa । sarva॑m mani॒ṣā॒ṇaḥ ॥ 24 ॥

Beauty and Fortune are your two consorts, each side of you are day and night.
The constellations are your form, the Ashvins your mouth.
Being such grant me whatever I desire; yonder world and all other happiness.

3. Maṇḍala Devata Homam

❖ *Oblate caru to each of the maṇḍala devatas.*

ॐ अंशु-मालिने स्वाहा ॥ अंशु-मालिने इदं न मम ॥
ॐ झष-ध्व्जाय ॥ ॐ कुमाराय ॥ ॐ विनायकाय ॥ ॐ अश्विभ्याम् ॥ ॐ चंद्राय ॥ ॐ दुर्गायै ॥ ॐ सप्त-मातृभ्यो ॥ ॐ स्थाणवे ॥ ॐ विष्णवे ॥ ॐ ब्रह्मणे ॥

oṁ aṁśumāline svāhā । dhvajāya । kumāraya । vināyakāya । aśvinī-devatābhyāṁ । candrāya । durgāyai । aṣṭamātṛbhyo । sthāṇave । viṣṇave । brahmaṇe ॥

❖ *followed by 8 oblations of ghee with the mūla-mantram.*

❖ *Taking the sruk fill the cavity with a ball of caru the size of a chicken's egg, add kindling, darbha, flower & with the sruva filled with ghee recite the mūla mantra and offers it to agni-sviṣṭakṛte;*

ॐ अग्नये स्विष्टकृते स्वाहा ॥ अग्नये स्विष्टकृते इदं न मम ॥
oṁ agnaye sviṣṭakṛte svāhā

❖ *Offer the following prāyaścitta oblations;*

१. ॐ षौं नमः पराय परमेष्ठ्यात्मने वासुदेवाय स्वाहा ।परमेष्ठ्यात्मने वासुदेवायेदं न मम ॥
1. oṁ ṣauṁ namaḥ parāya parameṣṭhyātmane vāsudevāya svāhā ।
parameṣṭhyātmane vāsudevāyedaṁ na mama ॥

२. ॐ यां नमः पराय पुरुषात्मने सङ्कर्षणाय स्वाहा । पुरुषात्मने सङ्कर्षणायेदं न मम ॥
2. oṁ yāṁ namaḥ parāya puruṣātmane saṅkarṣaṇāya svāhā ।
puruṣātmane saṅkarṣaṇāyedaṁ na mama ॥

३. ॐ रां नमः पराय विश्वात्मने प्रद्युम्नाय स्वाहा । विश्वात्मने प्रद्युम्नायेदं न मम ॥
3. oṁ rāṁ namaḥ parāya viśvātmane pradyumnāya svāhā ।
viśvātmane pradyumnāyedaṁ na mama ॥

४. ॐ वां नमः पराय निवृत्त्यात्मने अनिरुद्धाय स्वाहा । निवृत्त्यात्मने अनिरुद्धायेदं न मम ॥
4. oṁ vāṁ namaḥ parāya nivṛttyātmane aniruddhāya svāhā ।
nivṛttyātmane aniruddhāyedaṁ na mama ॥

५. ॐ लां नमः पराय सर्वात्मने नारायणाय स्वाहा । सर्वात्मने नारायणायेदं न मम ॥
5. oṁ lāṁ namaḥ parāya sarvātmane nārāyaṇāya svāhā ।
sarvātmane nārāyaṇāyedaṁ na mama ॥

4. Vāstu Homam

❖ *Taking 15 idhma dipping them in ghee the brahmana says;*

ॐ अस्मिन् भगवत् प्रतिष्ठाङ्ग वास्तु होम कर्मणि ब्रह्मन् इध्मम् आधास्ये — ॐ आधत्स्व।
oṁ asmin bhagavat pratiṣṭhāṅga vāstu homa karmaṇi brahman idhmam ādhāsye — oṁ ādhatsva.

ॐ प्रजापतये स्वाहा । प्रजापतये इदं ॥ oṁ prajāpataye svāhā । prajāpataye idaṁ ॥

ॐ इन्द्राय स्वाहा । इन्द्राय इदं ॥	oṁ indrāya svāhā । indrāya idaṁ ॥
ॐ अग्नये स्वाहा । अग्नये इदं ॥	oṁ agnaye svāhā । agnaye idaṁ ॥
ॐ सोमाय स्वाहा । सोमाय इदं ॥	oṁ somāya svāhā । somāya idaṁ ॥

वास्तोष्पते प्रतिं जानीह्यास्मान् स्वावेशो अनमीवो भवा नः ।
यत्वेमहे प्रति तन्नो जुषस्व शं नो एधि द्विपदे शं चतुष्पदे स्वाहा ॥
vāstoṣpate prati jānīhyāsmān svāveśo anamīvo bhavā naḥ ।
yatvemahe prati tanno juṣasva śaṁ no edhi dvipade śaṁ catuṣpade svāhā ॥
Acknowledge us O Guardian Spirit of the homestead: bring no disease, and give us happy entrance. Grant us that which we seek of you, and prosper our bipeds and quadrupeds.

वास्तोष्पते शग्मयासगुं सदा ते सक्षीमहि रण्वया गातुमत्या ।
आवह क्षेमे उत योगे वरं नो यूयं पात स्वस्तिभिस् सदा नस्स्वाहा ॥
vāstoṣpate śagmayāsaguṁ sadā te sakṣīmahi raṇvayā gātumatyā ।
āvaha kṣeme uta yoge varaṁ no yūyaṁ pāta svastibhis sadā nas svāhā ॥
Through your dear fellowship that brings welfare, may we be victorious, O Guardian of the Dwelling! Protect our happiness in rest and labour. Preserve us evermore with blessings.

वास्तोष्पते प्रतरणो एधि गोभिर् अश्वेभिरिन्दो ।
अजरासस् ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व स्वाहा ॥
vāstoṣpate prataraṇo edhi gobhir aśvebhirindo ।
ajarāsas te sakhye syāma piteva putrān prati no juṣasva svāhā ॥
Protector of the home, be our promoter; increase our wealth in cattle and steeds. O Indu.
May we be ever-youthful in your friendship; be pleased in us as in his sons a father.

अमीवहा वास्तोष्पत विश्वा रूपाण्याविशन् । सखा सुशेव एधि नस्स्वाहा ॥
amīvahā vāstoṣpata viśvā rūpāṇyāviśan । sakhā suśeva edhi nas svāhā ॥
O Guardian of the Homestead who destroys all disease and manifests in manifold forms, be an auspicious friend to us.

स्वस्त्ययनं तार्क्ष्यम् अरिष्टनेमिं महद्भूतं वायसं देवतानाम् ।
असुरघ्नम् इन्द्र सखं समत्सु बृहद्-यशो नावमिवा रुहेम स्वाहा ॥
svastyayanaṁ tārkṣyam ariṣṭanemiṁ mahadbhūtaṁ vāyasaṁ devatānām ।
asuraghnam indra sakhaṁ samatsu bṛhad-yaśo nāvamivā ruhema svāhā ॥
“May we attain well-being through Tarkshya, who is the destroyer of misfortunes, the great being among birds, the crow of the gods. The slayer of demons, the friend of Indra in battles, possessing great glory. May we ascend like a ship, swaha.”

अंहो मुचम् आङ्गिरसं गयं च स्वस्त्या-त्रेयं मनसा च तार्क्ष्यम् ।
प्रयत पाणिश्-शरणं प्र पद्ये स्वस्ति संबाधेष्वभयं नो अस्तु स्वाहा ॥
aṁho mucam āṅgirasaṁ gayaṁ ca svastyā-treyaṁ manasā ca tārkṣyam ।
prayata pāṇiḥ śaraṇaṁ pra padye svasti saṁbādheṣvabhayaṁ no astu svāhā ॥
“I seek refuge with Angiras, the remover of sin, and Gaya, with Tarkshya, who grants well-being, and Atri, through mind and hands with devotion. In distress, may there be safety for us, and may well-being be ours.”

- *The offer balis of lāja to each of the maṇḍala devatas and each of the dikpālakas.*
- *Offer pūrṇāhuti.*
- *Fill the sruk with ghee, samit and darbha and holding the sruva also filled with ghee stand and raise them to the level of the nose, offer the pūrṇahuti with the mūla-mantra and*

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

pūrṇam adaḥ pūrṇam idaṁ pūrṇāt pūrṇam udacyate ।
pūrṇasya pūrṇam ādāya pūrṇam evāvaśiṣyate ॥

That is perfect, this is perfect. The perfect arises from the perfect. Taking the perfect from the perfect, the perfect alone remains.

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा ॥

idaṁ viṣṇur vicakrame tredhā nidadhe padam । samūḍham asya pāgmँ sure svāhā ॥

Through all this world strode Vishnu; thrice His foot he planted, and the whole was gathered in His footstep's dust.

- *Fill the sruk with water from the prokṣani-pātra and pour it out around the kuṇḍa in a pradakṣiṇa manner the remaining water is scattered on the head.*
- *Worship agni with gandha and flowers and take ash to make tilaka.*

भक्त्या यदग्नौ विहितं यथा शक्ति यथा विधि ।आराधनं तवैवेदं गृहाण परमेश्वर ॥

bhaktyā yad agnau vihitaṁ yathā śakti yathā vidhi ।
ārādhanaṁ tavaivedaṁ gṛhāṇa parameśvara ॥

O Supreme Lord, please accept whatever has been offered in the fire with devotion according to our ability and according to ritualistic directives.

- *A sādhaka takes the darbha kūrca sets it on fire and takes it around the prasāda and then departs to bathe.*
- *Sweep the temple and sprinkle with gomaya water as well as the puṇyāha jalam.*
- *Decorate with flags and toraṇas and light akhaṇḍa dīpas.*
- *Scatter akṣata and mustard seeds with the astra mantra;*

ॐ नमः अस्त्राय फट् oṁ namaḥ astrāya phaṭ

नास्तिकान् भिन्न मर्यादान् देव ब्राह्मण निन्दिकान् । पाप रोग युतान् मर्त्यान् निन्दितान् पिशुनांस्तथा ॥

nāstikān bhinna maryādān deva brāhmaṇa nindikān ।
pāpa roga yutān martyān ninditān piśunāṁs-tathā ॥

पाषण्डिनो हीन-वृत्तीन् अतिलोमान् समत्सरान् । लुब्धान् मूर्खान् अविदुषो बहिर्निर्वासयेत् ततः ॥

pāṣaṇḍino hīna-vṛttīn atilomān samatsarān ।
lubdhān mūrkhān aviduṣo bahir-nirvāsayet tataḥ ॥

"Those who are antipathic to the Vedas, those who deviate from proper conduct, those who criticize gods and Brahmanas, those who are sinful, afflicted with contagious diseases, people who are contemptible, slanderers, hypocrites, those of degraded conduct, brutish people, envious people, greedy ones, fools, and the ignorant—such people should be expelled from the community."

- *Recite the following mantra and bind the entire prasād with a red and yellow cord.*

रक्षोहनो वलगहनो वैष्णवान् कनामीध महन्तं वलगम् उध्वंपाम् इयन्न समानो यं असमानो निचकान् एध मे न भद्रं करोमि यो नस् समानो योऽसमानोऽरथीयति गायत्रेण चन्दसाऽवभाडो वलगः किं अत्र भद्रन् तन्नौ सह विराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्य भिमाथिहा विश्वराडसि विश्वासान् नाष्ट्रानगुं हन्ता ॥

rakṣohano valagahano vaiṣṇavān kanāmīdha mahantaṁ valagam udhvapām iyanna samāno yaṁ asamāno nicakān edha me na bhadraṁ karomi yo nas samāno yo'samāno'rathīyati gāyatreṇa candasā 'vabhāḍo valagaḥ kiṁ atra bhadran tannau saha virāḍasi sapatnahā samrāḍasi bhrātṛvyahā svarāḍasya bhimāthihā viśvarāḍasi viśvāsān nāṣṭrānaguṁ hantā ॥

I dig those which are of Vishnu, which slay the forces of Chaos, which neutralize the spell. Here do I cast out the spell which an equal or unequal has buried against us. Here do I overthrow him who equal or unequal is ill-

disposed to us. The spell is overcome with the gayatri verse. What is here? Good. Let it be ours. You are the Ruler (Viraj,) slaying our rivals, You are the Ruler of all (Samraj) slaying our foes; you are the Self-ruler (Svaraj), slaying our enemies; you are the Ruler of the entire Universe (Vishvaraj) slayer of all destructive forces.

MṚTA SAṄGRAHAṆAM

- *The ācarya & ritviks take a spade, tray, a new cloth, all the articles for pūjā and with the yajamān and accompanied by the music and chanting proceed in an easterly or northerly direction.*
- *In a clean place take seat and do saṅkalpam.*

Saṅkalpaḥ — हरिः ॐ तत्सत् गोविन्द ३ भगवतो महा-पुरुषस्य विष्णोर् आज्ञया, प्रवर्तमानस्य आद्य ब्रह्मणो द्वितीय परार्धे श्वेत-वराह कल्पे वैवस्वत मन्वन्तरे अष्ठाविंशतितमे कलि युगे प्रथम पादे जम्बू-द्वीपे मेरोर् दक्षिण दिग्भागे _____देशे _____ नगरे प्रभवादि व्यवहारिकानां शष्टि संवत्सरानां मध्ये चन्द्रमानेन _____संवत्सरे _____अयने _____ऋतौ _____मासे _____पक्षे _____तिथौ _____वासरे _____नक्षत्रे युक्तायाम् शुभ योगे शुभ करणे एवम् गुण विशेषण विशिष्ठायां अस्यां शुभ तिथौ _____ देवस्य प्रतिष्ठा कर्माङ्गम् अङ्कूरार्पण सिद्ध्यर्थम् मृत्-सङ्ग्रहण कर्म करिष्ये ॥

hariḥ oṁ tatsat govinda 3 bhagavato mahā-puruṣasya viṣṇor ājñayā, pravartamānasya ādya brahmaṇo dvitīya parārdhe śveta-varāha kalpe vaivasvata manvantare aṣṭhāviṁśatitame kali yuge prathama pāde jambū-dvīpe meror dakṣiṇa digbhāge _____deśe _____ nagare prabhavādi vyavahārikānāṁ śaṣṭi saṁvatsarānāṁ madhye candramānena _____saṁvatsare _____ayane _____ṛtau _____māse _____pakṣe _____tithau _____vāsare _____nakṣatre yuktāyām śubha yoge śubha karaṇe evam guṇa viśeṣaṇa viśiṣṭhāyāṁ asyāṁ śubha tithau _____ devasya pratiṣṭhā karmāṅgam aṅkūrārpaṇa siddhyartham mṛt-saṅgrahaṇa karma kariṣye ॥

IN order to perform the sowing of the grain ceremony as an ancilliary to this rite of consecration we shall now do the gathering of the soil.

हरिः ॐ तत् सत् कृतं च करिष्यामि भगवन् नित्येन भगवत् कैङ्कर्य रूपम् महा विभूति चातुरात्म्य भगवद् वासुदेव पादारविन्द अर्चनेन ईज्यया भगवतः कर्मणा भगवन्तम् अर्चयिष्यामि ॥

hariḥ oṁ tat sat kṛtaṁ ca kariṣyāmi bhagavan nityena bhagavat kaiṅkarya rūpam mahā vibhūti cāturātmya bhagavad vāsudeva pādāravinda arcanena ījyayā bhagavataḥ karmaṇā bhagavantam arcayiṣyāmi ॥

"By the auspicious syllable 'Hariḥ Om Tat Sat,' I shall perform the act, O Lord, in the form of eternal service to the Blessed Lord with great splendor and the fourfold attributes, I shall worship the Lord Vāsudeva through His lotus feet, and by the instigation of the Blessed Lord, I shall worship the him."

भगवतो बलेन भगवतो वीर्येण भगवतस् तेजसा भगवतः कर्मणा भगवतः कर्म करिष्यामि भगवतो वासुदेवस्य ॥

bhagavato balena bhagavato vīryeṇa bhagavatas tejasā bhagavataḥ karmaṇā bhagavataḥ karma kariṣyāmi bhagavato vāsudevasya ॥

"By the strength of the Blessed Lord, by the valor of the Blessed Lord, by the radiance of the Blessed Lord, by the deeds of the Blessed Lord, I shall perform the work of the Blessed Lord Vāsudeva."

भगवान् एव स्वनियाम्य स्वरूप-स्थिति प्रवृत्ति स्व शेषतैक रसेन स्वकियैश्चोपकरणैः स्वाराधनैक प्रयोजनाय परम पुरुषः सर्वशेषी स्वशेष भूतम् इदम् अन्कूर् अर्पण कर्म स्वस्मै स्वप्रीतये स्वयम् एव कारयति ॥

bhagavān eva svaniyāmya svarūpa-sthiti pravṛtti sva śeṣataika rasena svakiyaiścopakaraṇaiḥ svārādhanaika prayojanāya parama puruṣaḥ sarvaśeṣī svaśeṣa bhūtam idaṁ ankūr arpaṇa karma svasmai svaprītaye svayam eva kārayati ॥

The Blessed Lord Himself, the Supreme Being, who is the master of all, through His own nature, being, and activity, in the essence of His unique servitude, with His own instruments, for the sole purpose of His own worship, causes this act of offering by His servant, who belongs to Him, for His own pleasure, to be performed by Himself.

❖ *With the arghya water sprinkle the ground and on the spade.*

ॐ तेजोल्काय स्वाहा । शक्त्यै शिखाय वषट् ॥
oṁ tejolkāya svāhā | śaktyai śikhāya vaṣaṭ ||

❖ *Recite Vishnu gāyatri.*
❖ *Perform ṣoṣanādi karma.*
❖ *Do aṅganyāsa with the following;*

ॐ भां हृदयाय नमः	oṁ bhāṁ hṛdayāya namaḥ
ॐ भीं शिरसे स्वाहा	oṁ bhīṁ śirase svāhā
ॐ भूं शिखायै वषट्	oṁ bhūṁ śikhāyai vaṣaṭ
ॐ भैं कवचाय हुं	oṁ bhaiṁ kavacāya huṁ
ॐ भौं नेत्राभ्यां वौषट्	oṁ bhauṁ netrābhyāṁ vauṣaṭ
ॐ भुः अस्त्राय फट्	oṁ bhuḥ astrāya phaṭ

Bhū-devī āvāhanam.

आवाहयेत् ततो भूमिं सर्वाभरण-भूषिताम् । द्विभुजाञ्च त्रिनेत्राञ्च करण्ड-मकुटान्विताम् ॥
āvāhayet tato bhūmiṁ sarvābharaṇa-bhūṣitām |
dvibhujāñca trinetrāñca karaṇḍa-makuṭānvitām ||

हेम-यज्ञोपवीतञ्च पित-नेत्रां सुयौवनाम् । पीतञ्च पीत-वस्त्रञ्च पुण्डरीक-दलैक्षणाम् ॥
hema-yajñopavītañca pita-netrāṁ suyauvanām |
pītañca pīta-vastrañca puṇḍarīka-dalaikṣaṇām ||

कृताञ्जलि पुटोवाऽपि चोत्पला लाञ्चितन् तु वा । भूमि देवि स्वरूपाय सर्वाभरण सुन्दरिम् ॥
kṛtāñjali puṭovā'pi cotpalā lāñcitan tu vā |
bhūmi devi svarūpāya sarvābharaṇa sundarim ||

नील षट्पद पुञ्जाभ कुटिलालक कोमले । कल्हार दक्षिण-करे भोग-शक्ति स्वरूपिणी ।
nīla ṣaṭpada puñjābha kuṭilālaka komale |
kalhāra dakṣiṇa-kare bhoga-śakti svarūpiṇī |

समस्त चिद्-अचिद् भेद मन्त्र यन्त्र विधायिनी । भूदेवी त्वां प्रार्थयामि सन्निध्यं कर्तुम् अर्हसि ॥
samasta cid-acid bheda mantra yantra vidhāyinī |
bhūdevī tvāṁ prārthayāmi sannidhyaṁ kartum arhasi ||

"Then, invoke the Earth Goddess, adorned with all kinds of ornaments, having two arms and three eyes, wearing a karanda crown. She is adorned with a golden sacred thread, has yellow eyes, is in the prime of youth, and is clad in yellow garments, with eyes resembling lotus petals. She may be depicted with folded hands or holding a lotus, embodying the form of the Earth Goddess, beautifully adorned with all kinds of ornaments.
She has soft, curly hair surrounded by clusters of blue bees, holds a water lily in her right hand, and embodies the power of enjoyment. She is the manifestor of all mantras and yantras, encompassing both sentient and insentient divisions. O Earth Goddess, I beseech you to be present and grant your auspicious presence."

ॐ भूं भूम्यै नमः । oṁ bhūṁ bhūmyai namaḥ |

ॐ भूम्यै नमः । महीष्यै । पृथिव्यै । वसुन्धरायै । वसुधायै । वासव्यै । हिरण्य-गर्भिण्यै । समुद्रवत्यै । मही-धरण्यै । विष्णु-पत्न्यै । व्यापिन्यै । धरायै ॥
oṁ bhūmyai namaḥ | mahīṣyai | pṛthivyai | vasundharāyai | vasudhāyai | vāsavyai | hiraṇya-garbhiṇyai | samudravatyai | mahī-dharaṇyai | viṣṇu-patnyai | vyāpinyai | dharāyai ||

ॐ धनुर्-धरायै विद्महे । सर्व सिद्ध्यैच धीमहि । तन्नो धरा प्रचोदयात् ॥
oṁ dhanur-dharāyai vidmahe | sarva siddhyaica dhīmahi | tanno dharā pracodayāt ||

वासुदेव प्रिये देवी लक्ष्मीषोत्सव सिद्धये । मृत्स्नायां सन्निधत्स्वात्र तद् उत्सव हितेषु मे ॥
vāsudeva priye devī lakṣmīṣotsava siddhaye |
mṛtsnāyāṁ sannidhatsvātra tad utsava hiteṣu me ||

O beloved goddess of Vasudeva, Lakshmi, for the success of this festival, please establish your presence here in this soil, for the benefit of this great celebration.

- *Offer pūjā to Bhūdevi*
- *While the ācārya touches the ground the brahmins chant the bhū sūkta show padma mudra.*
- *Lord Varāha is then invoked into the spade.*

Varāha āvāhanam

ॐ ह्रां नमो भगवते वराहाय । oṁ hrāṁ namo bhagavate varāhāya |

ॐ भू वराहाय विद्महे । हिरण्यगर्भाय धीमहि । तन्नो वराह प्रचोदयात् ॥
oṁ bhū varāhāya vidmahe | hiraṇyagarbhāya dhīmahi | tanno varāha pracodayāt ||

क्रोढावतार भूम्याप्ति हिरण्याक्ष वधोद्युत ।सन्निधत्स्व खनित्रेऽस्मिन् लोकानां क्षेम हेतवे ॥
उत्सवार्थं रमेशस्य मृत्-सङ्ग्रहण कर्मणि ।
kroḍhāvatāra bhūmyāpti hiraṇyākṣa vadhodyuta |
sannidhatsva khanitre'smin lokānāṁ kṣema hetave ||
utsavārthaṁ rameśasya mṛt-saṅgrahaṇa karmaṇi |

"O powerful one, who took the form of a boar to rescue the Earth and slay Hiranyaksha, please be present in this sacrificial site for the welfare of the worlds. For the purpose of the festival of Ramesha, in the act of collecting the sacred earth, grant your auspicious presence."

Do aṅga-nyāsaḥ

ॐ ह्रां हृदये नमः	oṁ hrāṁ hṛdaye namaḥ
ॐ ह्रीं शिरसे स्वाहा	oṁ hrīṁ śirase svāhā
ॐ ह्रूं शिखायै वषट्	oṁ hrūṁ śikhāyai vaṣaṭ
ॐ ह्रैं कवचाय हुं	oṁ hraiṁ kavacāya huṁ
ॐ ह्रौं नेत्राभ्यां वौषट्	oṁ hrauṁ netrābhyāṁ vauṣaṭ
ॐ ह्रः अस्त्राय फट्	oṁ hraḥ astrāya phaṭ

- *Show **varāha mudra** and offer upacāras to Bhū-varāha.*
- *Offer karpura hārati;*

उपेन्द्र प्राकृतः पुण्य पुष्कलो विश्वभावनः । असुरघ्नो कृतान्तश्च भूत नाथोऽष्टकः श्रुतः ॥
upendra prākṛtaḥ puṇya puṣkalo viśvabhāvanaḥ |
asuraghno kṛtāntaśca bhūta nātho'ṣṭakaḥ śrutaḥ ||

"Upendra (Vishnu in the form of Vamana) is known as the natural embodiment of virtue and the creator of the universe. He is the slayer of demons, the destroyer (of evil), the lord of all beings, and is also known by the eight sacred syllables."

- *The ācarya faces the east and takes the spade in hand and recalls to mind Bhū-varāha.*
- *The earth is dug while chanting the following sūkta*

अश्व-क्रा॑ंते र॑थ-क्रा॑ंते वि॒ष्णु क्रा॑ंते व॒सुंध॑रा । शिरसा॑ धार॑यिष्या॒मि॒ र॒क्ष॒स्व मा॑ं पद॒े पदे ॥ ४ ॥
aśva-krā̱nte ra̱tha-krā̱nte vi̱ṣṇu krā̱nte va̱sundha̱rā |
śirasā̱ dhāra̱yiṣyā̱mi̱ ra̱kṣa̱sva mā̱ṁ pada̱ pade ॥ 4 ॥

O earth that is traversed by a horse, a chariot and Vishnu I shall place you upon my head; protect me at every step.

भूमिर्धेनुर्धरणि लोक धारिणी उद्धृतासि वराहेण कृष्णेन शत बाहुना ॥ ५ ॥

bhūmir dhenur dharaṇi loka dhāriṇī
uddhṛtāsi varāheṇa kṛṣṇena śata bāhunā ॥ 5 ॥

The earth is the giver of happiness like a milch cow, the sustainer of life and support for all living beings. You were raised up by the black Boar having a hundred hands.

मृत्तिके हन (मे) पापं यन्मया दुष्कृतं कृतम् । मृत्तिके ब्रह्म दत्तासि काश्यपेनाभिमंत्रिता ।
मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॥ ६ ॥

mṛttike hana (me) pāpaṁ yan mayā duṣkṛtaṁ kṛtam ।
mṛttike brahma dattāsi kāśyapena abhimantritā ॥
mṛttike dehi me puṣṭiṁ tvayi sarvaṁ pratiṣṭhitam।

O excellent earth, destroy my evil deeds that I have committed. O excellent earth you are a gift from Brahma to creatures. Kasyapa the progenitor has sanctified you. O earth grant me prosperity, for everything depends on you.

मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके । त्वया हतेन पापेन गच्छामि परमां गतिम् ॥ ७ ॥

_mṛttike pratiṣṭhite sarvaṁ tanme nirṇuda mṛttike ।
tvayā hatena pāpena gacchāmi paramāṁ gatim ॥ 7 ॥

O excellent earth, the support of all beings, cleanse all defects from me, my evil deeds (which are obstacles) having been effaced by you, I shall attain to the highest goal.

- *The earth is collected and placed on the tray.*
- *It is covered with the new cloth while reciting the mūla mantra.*
- *Together with sand from the banks of a river and cow dung it is placed on a cart or on a tray on the heads of the paricārakas.*
- *The procession then returns to the maṇḍapa after having circumambulated the village.*
- *The ritviks chant the śākuna sūktam & bhū sūktam while walking.*

śākuna sūktam

अनुहवं परिहवं परीवादं परिक्षपम् । दुस्स्वप्नं दुरुदितं तद् द्विषद्भ्यो दिशाम्यहम् ॥

anuhavaṁ parihavaṁ parīvādaṁ parikṣapam ।
duḥ svapnaṁ dur-uditaṁ tad dviṣadbhyo diśāmyaham ॥

"I direct away from us the following: censure, defamation, slander, destruction, bad dreams, and evil weeping, towards those who bear ill-will against us."

अनुहूतं परिहूतगुं शकुनेर्यद् अशाकुनम् । मृगस्य सृतं अक्ष्णया तद् द्विषद्भ्यो दिशाम्युहम् ॥

anuhūtaṁ parihūtaguṁ śakuner-yad aśākunam ।
mṛgasya sṛtaṁ akṣṇayā tad dviṣadbhyo diśāmyaham ॥

"Whatever inauspiciousness has been brought about or caused by the cries of the owl or other birds, and whatever evil has been indicated by the flight of the deer, I direct that towards our enemies.

आरात्ते अग्निरस्त्वारात् परशुर् अस्तु ते । निवाते त्वाभिवर्षतु स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्तु वनस्पते ॥

ārātte agnir astvārāt paraśur astu te । nivāte tvābhivarṣatu svasti te 'stu vanaspate svasti me'stu vanaspate ॥

May the fire be far from you, may the axe be far from you. May it rain upon you in abundance; may it be well with you, O lord of the forest, may it be well with me, O lord of the forest.

नमः शकृत्सदे रुद्राय नमो रुद्राय शकृत्सदे । गोष्ठमसि नमस्ते अस्तु मा माहिगुं सीः ॥

namaḥ śakṛtsade rudrāya namo rudrāya śakṛtsade ।
goṣṭhamasi namaste astu mā māhiguṁ sīḥ ॥

Salutations to Rudra who abides in cow dung, salutations to Rudra who resides in cow dung. You are in the cow-pen; salutations to you, do not harm me.

सिग॑सि॒ नसि॒ वज्रो॒ नम॑स्तेऽस्तु॒ मा माहिगुं सीः । उ॒द्गा॒तेव॑ शा॒कुने॒ साम॑ गायसि ब्रह्म-पु॒त्र इ॑व॒ सव॑नेषु शगुं ससि ॥ स्व॒स्ति न॑: शा॒कुने॑ अस्तु॒ प्रति॑-नः सु॒मना॑ भव ॥

sigaॅsi॒ nasi॒ vajro॒ namaॅste'stu॒ mā māhiguṁ sīḥ । u॒dgā॒teva॑ śa॒kune॒ sāma॑ gāyasi brahma-pu॒tra iva॒ savaॅneṣu śaguṁ sasi ॥ sva॒sti naॅḥ śa॒kune॑ astu॒ prati॑-naḥ su॒manā॑ bhava ॥

You are the thunderbolt, salutations to you, do not harm me. Like the Udgātā (a priest), you sing the Sāma (a Vedic hymn), like the son of Brahma, you cry out in the sacrifices. May it be well with us, O Good Omen, may you be well-disposed towards us."

PĀLIKA VIDHĀNAM

- *With the viṣṇu gāyatrī the 8 pālikās are sprinkled.*
- *Leaves of the dūrva, aśvattha, śirīṣa and bilva are tied around there necks with white thread.*
- *The earth and cow dung is placed into them.*
- *The aṅkūr arpaṇa vedi is prepared by scattering rice grains over it.*
- *Three lines are drawn with kuśa grass from west to east and from south to north.*
- *Salute the lines as follows;*

ॐ षौं नमः पराय परमेष्ठ्यात्मने ।	oṁ ṣauṁ namaḥ parāya parameṣṭhyātmane ।
ॐ यां नमः पराय पुरुषात्मने ।	oṁ yāṁ namaḥ parāya puruṣātmane ।
ॐ रां नमः पराय विश्वात्मने ।	oṁ rāṁ namaḥ parāya viśvātmane ।

- *The vedi is aspersed and eastward pointing kuśa grass is scattered upon it.*
- *The eight pālikas are then placed on the vedi with the Soma Kumbha in the middle.*
- *The Soma Kumbha is filled with scented water while chanting the vyāhṛtis.*
- *The five jewels, tulsi leaves, betel nut and five leaves are placed in the kumbha.*
- *A kūrca made of 21 blades of kuśa grass is added and a coconut is placed on the top.*



AṄKURĀRPAṆAM

- *The ācārya goes to aṅkur arpana vedi and sits facing east.*
- *take the puṇyāha kumbha and sprinkle the pālikas that have been arranged on the vedi.*

Invocation of Deities.

Centre	ॐ भूः ब्रह्माणं आवाहयामि!	oṁ bhūḥ brahmāṇaṁ āvāhayāmi!
	ॐ भुवः प्रजापतिम् आवाहयामि!	oṁ bhuvaḥ prajāpatim āvāhayāmi!
	ओगुं सुवः हिरण्यगर्भम् आवाहयामि!	oguṁ suvaḥ hiraṇyagarbham āvāhayāmi!
	ॐ भूर्भुवस्सुवः चतुर्मुखम् आवाहयामि!	oṁ bhūr bhuvas suvaḥ catur-mukham 0
	ब्रह्मणे इदम् आसनम्!	brahmaṇe idaṁ āsanam!
East	ॐ भूः इन्द्रम् आवाहयामि!	oṁ bhūḥ indram āvāhayāmi!
	ॐ भुवः वज्रिणम् आवाहयामि!	oṁ bhuvaḥ vajriṇam āvāhayāmi!

ओगुं सुवः शतक्रतु आवाहयामि! oguṁ suvaḥ śatakṛatu āvāhayāmi!
ॐ भूर्भुवस्सुवः शचिपतिम् आवाहयामि! oṁ bhūr bhuvas suvaḥ śaci-patim 0
इन्द्राय इदम् आसनम्! indrāya idaṁ āsanam!

South East
ॐ भूः अग्निम् आवाहयामि! oṁ bhūḥ agnim āvāhayāmi!
ॐ भुवः वह्निं आवाहयामि! oṁ bhuvaḥ vahniṁ āvāhayāmi!
ओगुं सुवः पावकम् आवाहयामि! oguṁ suvaḥ pāvakam āvāhayāmi!
ॐ भूर्भुवस्सुवः वीति-होत्रम् आवाहयामि! oṁ bhūr bhuvas suvaḥ vīti-hotram 0
अग्नये इदम् आसनम्! agnaye idaṁ āsanam!

South
ॐ भूः यम आवाहयामि! oṁ bhūḥ yama āvāhayāmi!
ॐ भुवः वैवस्वतम् आवाहयामि! oṁ bhuvaḥ vaivasvatam āvāhayāmi!
ओगुं सुवः पित्रपतिम् आवाहयामि! oguṁ suvaḥ pitr-patim āvāhayāmi!
ॐ भूर्भुवस्सुवः धर्म-राजम् आवाहयामि! oṁ bhūr bhuvas suvaḥ dharma-rājam 0
यमाय इदम् आसनम्! yamāya idaṁ āsanam!

South West
ॐ भूः निर्ऋतिम् आवाहयामि! oṁ bhūḥ niṛṛtim āvāhayāmi!
ॐ भुवः यातुधानम् आवाहयामि! oṁ bhuvaḥ yātudhānam āvāhayāmi!
ओगुं सुवः नक्तञ्चरम् आवाहयामि! oguṁ suvaḥ naktañcaram āvāhayāmi!
ॐ भूर्भुवस्सुवः पुण्य-जनम् आवाहयामि! oṁ bhūr bhuvas suvaḥ puṇya-janam 0
नैर्ऋतये इदम् आसनम्! nairṛtaye idaṁ āsanam!

West
ॐ भूः वरुणम् आवाहयामि! oṁ bhūḥ varuṇam āvāhayāmi!
ॐ भुवः प्रचेतसम् आवाहयामि! oṁ bhuvaḥ pracetasam āvāhayāmi!
ओगुं सुवः सुरूपिणम् आवाहयामि! oguṁ suvaḥ surūpiṇam āvāhayāmi!
ॐ भूर्भुवस्सुवः अपाम्पतिम् आवाहयामि! oṁ bhūr bhuvas suvaḥ apām-patim 0
वरुणाय इदम् आसनम्! varuṇāya idaṁ āsanam!

North West
ॐ भूः वायुम् आवाहयामि! oṁ bhūḥ vāyum āvāhayāmi!
ॐ भुवः पवनम् आवाहयामि! oṁ bhuvaḥ pavanam āvāhayāmi!
ओगुं सुवः मरुतम् आवाहयामि! oguṁ suvaḥ marutam āvāhayāmi!
ॐ भूर्भुवस्सुवः समीरणम् आवाहयामि! oṁ bhūr bhuvas suvaḥ samīraṇam 0!
वायवे इदम् आसनम्! vāyave idaṁ āsanam!

North
ॐ भूः सोमम् आवाहयामि! oṁ bhūḥ somam āvāhayāmi!
ॐ भुवः इन्दुम् आवाहयामि! oṁ bhuvaḥ indum āvāhayāmi!
ओगुं सुवः निशाकरम् आवाहयामि! oguṁ suvaḥ niśākaram āvāhayāmi!
ॐ भूर्भुवस्सुवः ओषधीसम् आवाहयामि! oṁ bhūr bhuvas suvaḥ oṣadhīsam 0
सोमाय इदम् आसनम्! somāya idaṁ āsanam!

North East
ॐ भूः ईशानम् आवाहयामि! oṁ bhūḥ īśānam āvāhayāmi!
ॐ भुवः शूलिनम् आवाहयामि! oṁ bhuvaḥ śūlinam āvāhayāmi!
ओगुं सुवः उमापतिम् आवाहयामि! oguṁ suvaḥ umāpatim āvāhayāmi!
ॐ भूर्भुवस्सुवः पिनाकिनम् आवाहयामि! oṁ bhūr bhuvas suvaḥ pinākinam āvāhayāmi!
ईशानाय इदम् आसनम्! īśānāya idaṁ āsanam!

ब्रह्मणे नमः । इन्द्राय नमः । अग्नये नमः । यमाय नमः । निर्ऋतये नमः । वरुणाय नमः । वायवे नमः । सोमाय नमः । ईशानाय नमः ॥
brahmaṇe namaḥ | indrāya namaḥ | agnaye namaḥ | yamāya namaḥ | nirṛtaye namaḥ | varuṇāya namaḥ | vāyave namaḥ | somāya namaḥ | īśānāya namaḥ ||

Upacāra

ब्रह्मादिभ्यो नमः । पाद्यं । अर्घ्यं । आचमनियं । समस्तोपचारान् समर्पयामि ॥
brahmādibhyo namaḥ | pādyaṁ | arghyaṁ | ācamaniyaṁ | samastopacārān samarpayāmi ||

- *Take the vessel with the seeds mix in some milk;*

दिशाम् पतीन् नमस्यामि सर्व काम फल प्रदान् । कुर्वन्तु सफलं कर्म कुर्वन्तु सततम् शुभम् ॥
diśām patīn namasyāmi sarva kāma phala pradān |
kurvantu saphalaṁ karma kurvantu satatam śubham ||

I bow to the Lords of the directions, the granters of all desired fruits. May they make my actions successful and always bring about auspiciousness.

Soma Āvāhanam

- *Invoke Soma in the kumbha*

सोमो धेनुगुं सोमो अर्वन्तम् आशुम् । सोमो वीरं कर्मण्यं दधातु ।
साधन्यं विदथ्यगुं सभेयं । पितुश् श्रवणं यो ददाशद् अस्मै ॥
somo dhenuguṁ somo arvantam āśum | somo vīraṁ karmaṇyaṁ dadhātu |
sādhanyaṁ vidathyaguṁ sabheyaṁ | pituś śravaṇaṁ yo dadāśad asmai ||

"May Soma grant us cows, may Soma grant us swift horses. May Soma bestow upon us a heroic person dedicated to actions. May he provide us with prosperity in assemblies and councils. May he grant the renown of the manes to this person."

- *Do aṅganyāsaḥ using the bija sāṁ*
- *Offer 16 upacāras.*
- *Invite four brahmins to chant "oṣadhi sūktam"*

या जाता ओषधयो देवेभ्यस् त्रियुगं पुरा । मन्धामि बभ्रूणां महागुं शतन् धामानि सप्त च ॥ १ ॥
yā jātā oṣadhayo devebhyas triyugaṁ purā |
mandhāmi babhrūṇā mahāguṁ śatan dhāmāni sapta ca || 1 ||
शतं वो अम्ब धामानि सहस्रमुत वो रुहः । अधा शतकृत्वो यूयं इमं मे अगदं कृत ॥ २ ॥
śataṁ vo amba dhāmāni sahasram uta vo ruhaḥ |
adhā śata-kṛtvo yūyaṁ imaṁ me agadaṁ kṛta || 2 ||
पुष्पावतीः प्रसूवतीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ ३ ॥
puṣpāvatīḥ prasūvatīḥ phalinīr aphalā uta |
aśvā iva sajitvarīr virudhaḥ pārayiṣṇavaḥ || 3 ||
ओषधीरिति मातरस्तद्वो देवी उपब्रुवे । रपागुं सि विघ्न तीरितरपश्चतयमनः ॥ ४ ॥
oṣadhīr iti mātaras tadvo devī upabruve |
rapāguṁ si vighna tīr-itarapaś catayamanaḥ || 4 ||
अश्वत्थेवो निषदनं पर्णेवो वसतिष्कृता । गोभाज इत्किलासथ यत् सनवथ पुरुषम् ॥ ५ ॥
aśvatthevo niṣadanaṁ parṇevo vasatiṣkṛtā |
gobhāja it-kilāsatha yat sanavatha puruṣam || 5 ||
यदुहं वाजयन् इमा ओषधिर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ ६ ॥

yadahaṁ vājayan imā oṣadhir hasta ādadhe ।
ātmā yakṣmasya naśyati purā jīvagṛbho yathā ॥ 6 ॥

यद् ओषधयः सङ्गच्छन्तेराजानः समितावि व । विप्रः स उच्यते भिषगुं रक्षोहाऽमीवचातनः ॥ ७ ॥
yad oṣadhayaḥ saṅgacchante rājānas samitāviva ।
vipras sa ucyate bhiṣaguṁ rakṣohā'mīva cātanaḥ ॥ 7 ॥

इष्कृतिर्नाम वो माता ऽथो यूयगुं स्थ संकृतीः । सीराः पतत्रिणीः स्थन यदामयति निष्कृथ ॥ ८ ॥
iṣkṛtir nāma vo mātā 'tho yūyaguṁ stha saṁkṛtīḥ ।
sīrāḥ patatriṇīḥ sthana yadāmayati niṣkṛtha ॥ 8 ॥

अन्यावो अन्यमवत्वन्याऽन्यस्या उपावत । तास्सर्वा ओषधयः सविधाना इदं मे प्रावताववचः ॥ ९ ॥
anyā vo anyamavat vanyā'nyasyā upāvata ।
tās sarvā oṣadhayas savidhānā idaṁ me prāvatā vacaḥ ॥ 9 ॥

उच्छुष्मा ओषधीनां गावो गोष्ठदिवेरते । धनगुं सनिष्यन्तीना मात्मानं तव पूरुष ॥ १० ॥
ucchuṣmā oṣadhīnāṁ gāvo goṣṭhadiverate ।
dhanaguṁ saniṣyantīnā mātmānaṁ tava pūruṣa ॥ 10 ॥

अति विश्वाः परिष्ठाः स्तेन इव व्रजम् अक्रमुः । ओषधयः प्राचुच्यवुर्यत्किञ्च तनुवागुं रपः ॥ ११ ॥
ati viśvāḥ pariṣṭhāḥ steṇa iva vrajam akramuḥ ।
oṣadhayaḥ prācucyavur yatkiñca tanuvāguṁ rapaḥ ॥ 11 ॥

याः त आतस्तुरात्मानंया आविविशुः परुष्परुः । तास्तेयक्ष्मम्वि बाधध्वम् उग्रो मध्यमशीरिव ॥१२
yāḥ ta ātastur ātmānaṁ yā āviviśuḥ paruṣparuḥ ।
tāste yakṣmamvi bādhadhvam ugro madhyama śīriva ॥ 12 ॥

साकं यक्ष्म प्र पत चाषेण किकिदीविनाँ । साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥ १३ ॥
sākaṁ yakṣma pra pata cāṣeṇa kikidīvināँ ।
sākaṁ vātasya dhrājyā sākaṁ naśya nihākayā ॥ 13 ॥

अश्वावतीगुं सोमवती मूर्जयन्तीम् उदोजसम् । आविंत्सि सर्वा ओषधीरस्मा अरिष्ट तातये ॥ १४ ॥
aśvāvatīguṁ somavatī mūrjayantīm udojasam ।
āvitsi sarvā oṣadhīr asmā ariṣṭa tātaye ॥ 14 ॥

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पणीः । बृहस्पति प्रसूता स्ता नो मुञ्चत्वगुं हसः ॥ १५ ॥
yāḥ phalinīr yā aphalā apuṣpā yāśca puṣpaṇīḥ ।
bṛhaspati prasūtā stā no muñcatvaguṁ hasaḥ ॥ 15 ॥

याः ओषधयः सोम राज्ञीः प्रविष्ठाः पृथिवीं अनु । तासां त्वम् असयुत्तमा प्रणो जीवात वे सुव ॥ १६ ॥
yāḥ oṣadhayaḥ soma rājñīḥ praviṣṭhāḥ pṛthivīṁ anu ।
tāsāṁ tvam asyuttamā praṇo jīvāta ve suva ॥ 16 ॥

अवपतन्तीर्वदन् दिव ओषधयस् परि । यं जीवम् अश्नवामहे न स रिष्यात पुरुषः ॥ १७ ॥
avapatantīr vadan diva oṣadhayas pari ।
yaṁ jīvam aśnavāmahe na sa riṣyāti puruṣaḥ ॥ 17 ॥

याश्चेदम् उपशृण्वन्ति याश्च दूरं परागताः । इह सङ्गत्य ताः सर्वा अस्मै सन्धत्त भेषजम् ॥ १८ ॥
yāścedam upaśṛṇvanti yāśca dūraṁ parāgatāḥ ।
iha saṅgatya tās sarvā asmai sandhatta bheṣajam ॥ 18 ॥

मा वो रिषत्खनिता यस्मै चाहं खनामि वः । द्विपच्चतुष्पदस्माकगुं सर्वम् अस्त्वन् आतुरम् ॥ १९ ॥

mā vo riṣat khanitā yasmai cāhaṁ khanāmi vaḥ ।
dvipac-catuṣpad asmākaguṁ sarvam astvan āturam ॥ 19 ॥

ओषधयः सं वदन्ते सोमेन सह राज्ञा । यस्मै करोति ब्राह्मण् स्तगुं राजन् पारयामसि ॥ २० ॥

oṣadhayaḥ saṁ vadante somena saha rājñā ।
yasmai karoti brāhmaṇ staguṁ rājan pārayāmasi ॥ 20 ॥

❖ *Then with the following mantras place the seeds in the palikas, cover with sand and sprinkle water.*

East

त्रतारम् इन्द्रम् अवितारम् इन्द्रगुं हवे हवे सुहवगुं शूरम् इन्द्रम् ।
हुवे नु शक्रं पुरुहूतम् इन्द्रगुं स्वस्ति नो मघवा धात्विन्द्रः ॥

tratāram indram avitāram indraguṁ have have suhavaguṁ śūram indram ।
huve nu śakraṁ puruhūtam indraguṁ svasti no maghavā dhātvindraḥ ॥

ॐ इन्द्राय नमः । अयं बीज अवापः ॥ oṁ indrāya namaḥ । ayaṁ bīja avāpaḥ ॥

South-east

त्वमग्ने अयास्य यासन् मनसा हितः । अयासन् हव्यम् ऊहिषे यानो धेहि भेषजम् ।
tvam agne ayāsya yāsanmanasā hitaḥ । ayāsan havyamūhiṣe yāno dhehi bheṣajam ॥

ॐ अग्नये नमः । अयं बीजावापः ॥ oṁ agnaye namaḥ । ayaṁ bījāvāpaḥ ॥

South

सुगन् नः पन्थाम् अभयं कृणोतु । यस्मिन् नक्षत्रे यम एति राजा ।
यस्मिन् नेनम् अभ्यषिञ्चन्त देवाः । यद् अस्य चित्रगुं हविषा यजाम ॥
sugan naḥ panthām abhayaṁ kṛṇotu । yasmin nakṣatre yama eti rājā ।
yasmin nenam abhyaṣiñcanta devāḥ । yad asya citraguṁ haviṣā yajāma ॥

ॐ यमाय नमः । अयं बीज अवापः ॥ oṁ yamāya namaḥ । ayaṁ bīja avāpaḥ ॥

South-east

असुन्वन्तम् अयजमानम् इच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यम् अस्मद् इच्छ सा त इत्या नमो देवि निरृते तुभ्यम् अस्तु ॥
asunvantam ayajamānam iccha stenasyetyāmanvihi taskarasya ।
anyam asmad iccha sā ta ityā namo devi nirṛte tubhyam astu ॥ VS.12.62a;

ॐ नैर्ऋतये नमः । अयं बीज अवापः ॥ oṁ nairṛtaye namaḥ । ayaṁ bīja avāpaḥ ॥

West

तत् त्वा यामि ब्रह्मणा वन्दमानस् तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशगुंस मा न आयुः प्रमोषीः ॥
tat tvā yāmi brahmaṇā vandamānas tadā śāste yajamāno havirbhiḥ ।
aheḍamāno varuṇeha bodhyuruśaguṁsa mā na āyuḥ pramoṣīḥ ॥

ॐ वरुणाय नमः । अयं बीज अवापः ॥ oṁ varuṇāya namaḥ । ayaṁ bīja avāpaḥ ॥

North-west

आ नो नियुद्भिश् शतिनीभिर् अध्वरगुं सहस्रिणीभिर् उप याहि यज्ञं ।
वायो अस्मिन्त्सवने मादयस्व यूयम् पात स्वस्तिभिससदा नः ॥
ā no niyudbhiś śatinībhir adhvaraguṁ sahasriṇībhir upa yāhi yajñaṁ ।
vāyo asmintsavane mādayasva yūyam pāta svastibhis sadā naḥ ॥ VS.27.28a;

ॐ वायवे नमः । अयं बीज अवापः ॥ oṁ vāyave namaḥ । ayaṁ bīja avāpaḥ ॥

North

वयगुं सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तस्सचेमहि ॥
vayaguṁ soma vrate tava manas tanūṣu bibhrataḥ । prajāvantas sacemahi ॥

ॐ सोमाय नमः । अयं बीज अवापः ॥ oṁ somāya namaḥ । ayaṁ bīja avāpaḥ ॥

North-east

तम् ईशानं जगतस् तस्थुषस् पतिं धियं जिन्वम् अवसे हूमहे वयम् ।
पूषा नो यथा वेदसाम् असद् वृधे रक्षिता पायुर् अदब्धस् स्वस्तये ॥
tam īśānaṁ jagatas tasthuṣas patiṁ dhiyaṁ jinvam avase hūmahe vayam ।
pūṣā no yathā vedasām asad vṛdhe rakṣitā pāyur adabdhas svastaye ॥

ॐ ईशानाय नमः । अयं बीज अवापः ॥ oṁ īśānāya namaḥ । ayaṁ bīja avāpaḥ ॥

- *Sprinkle with water and cover with darbha or cloth.*
- *Perform Soma Homam*
- *The Pālikas should be worshipped in the morning and the evening of each day of the festival.*
- *On the fifth or seventh day they can be discarded.*

PRATISARBANDHA JAPA KRAMAḤ

- *In the evening having bathed and done sandhya vandana the yajamana and the ritviks assemble to do the pratisarbandha japa.*
- *A sthaṇḍila is prepared.*
- *Do the rekha kriya and paristaranam and establish a kumbha on the sthaṇḍila fill it with the vyāhritis.*
- *Insert five gems and tulasi leaves, betel etc, insert a 21 darbha kurca, cover with the five leaves and a coconut, wrap it in a new cloth and invoke varuṇa offer puja.*
- *On the top of the kumbha place the rakṣa-sutras composed of 9 threads and stained with tumeric.*

Saṅkalpaḥ — पूर्वोक्त गुण विशेषण विसिष्ठायां अस्यां शुभ तिथौ भगवद् आज्ञया भगवद् कैङ्कर्य रूपेण भगवत् प्रतिष्ठाङ्ग प्रतिसर्बन्ध कर्म करिष्ये ॥

pūrvokta guṇa viśeṣaṇa visiṣṭhāyāṁ asyāṁ śubha tithau bhagavad ājñayā bhagavad kaiṅkarya rūpeṇa bhagavat pratiṣṭhāṅga pratisarbandha karma kariṣye ॥

On this auspicious day, with the aforementioned qualities and attributes, by the command of the Lord, as a service to the Lord, I shall perform the ritual related to the installation of the Lord's image.

- *Invite four brahmanas to sit in each on the four directions.*

अस्मिन् प्रतिसर्बन्ध जप कर्मणि पूर्वस्यां दिशि जप-कर्तारं त्वां वृणीमहे ।
asmin pratisarbandha japa karmaṇi pūrvasyāṁ diśi japa-kartāraṁ tvāṁ vṛṇīmahe ।

दक्षिणस्यां दिशि जप-कर्तारं त्वां वृणीमहे । dakṣiṇasyāṁ diśi japa-kartāraṁ tvāṁ vṛṇīmahe ।
पश्चिमस्यां दिशि जप-कर्तारं त्वां वृणीमहे । paścimasyāṁ diśi japa-kartāraṁ tvāṁ vṛṇīmahe ।
उत्तरस्यां दिशि जप-कर्तारं त्वां वृणीमहे ॥ uttarasyāṁ diśi japa-kartāraṁ tvāṁ vṛṇīmahe ॥

JAPA KRAMAḤ

विष्णोर् नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि यो अस्कभायद् उत्तरꣳ सधस्थं विचक्रमाणस् त्रेधो रुगायो विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रेस्थो विष्णोस्यूरसि विष्णो ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

viṣṇor nukaṁ vīryāṇi pravocaṁ yaḥ pārthivāni vimame rajāgṁ si yo askabhāyad uttaragṁ sadhastha ṁ vicakramāṇas tredho rugāyo viṣṇo rarāṭamasi viṣṇoḥ pṛṣṭhamasi viṣṇoḥ śñaptrestho viṣṇos yūrasi viṣṇo dhruvam asi vaiṣṇavam asi viṣṇave tvā ॥

I will declare the mighty deeds of Vishnu; of Him who measured out the earthly regions. Who established the highest abode, thrice setting down His footstep, widely striding. RV.1:154:1 You are the forehead of Vishnu; You are the back of Vishnu; ye two are the corners of Vishnu's mouth. You are the thread of Vishnu, You are the fixed point of Vishnu. You are of Vishnu; to Vishnu you. TS. 1:2:13

कृणुष्व-पाजः प्रसितिं न पृथ्वीं या हि राजेवामवागुं इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोस्तासि विध्य रक्षसस्-तपिष्ठैः ॥ १ ॥
kṛṇuṣva-pājaḥ prasitiṁ na pṛthvīṁ yā hi rājevāmavāguṁ ibhena ।
tṛṣvīmanu prasitiṁ drūṇānostāsi vidhya rakṣasas-tapiṣṭhaiḥ ॥ 1 ॥
1. Extend your powerful influence like a wide spreading net; go like a mighty king with his attendants. Follow your swift net, shooting arrows, transfix the forces of chaos with your darts that burn so fiercely.

तव भ्रमास आशुया पतङ्त्यनु-स्पृश धृषता शोशुचानः ।
तपूꣳष्यग्ने जुह्वा पतङ्गान सन्दितो विसृज विश्वꣳ गुल्काः ॥ २ ॥
tava bhramāsa āśuyā pataṅtyanu-spṛśa dhṛṣatā śośucānaḥ ।
tapūggaṣyagne juhvā pataṅgāna saṅdito visṛja viśva gulkāḥ ॥ 2 ॥
2. Go forth in rapid flight with your whirling weapons; follow them closely glowing in your fury. Spread your tongue-like winged flames, O Agni cast your firebrands without encumbrance all around you.

प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
योनो दूरे अघशꣳसो यो अङ्त्यग्ने माकिष्टे व्यथिराद्-अधर्षीत् ॥ ३ ॥
prati spaśo visṛja tūrṇitamo bhavā pāyurviśo asyā adabdhaḥ ।
yono dūre aghaśagṁ so yo aṅtyagne mākiṣṭe vyathirād-adharṣīt ॥ 3 ॥
3. Send your spies forward, fleetest in their movement; do not go astray; the guardian of this people.
Punish the one who near or far is bent on hurting us, and let no trouble sent from you affect us.

उद्-अग्ने तिष्ठ प्रत्यातनुष्व न्यमित्रागुं ओषतात्-तिग्महेते ।
योनो आरतिगुं समिधान चक्रे नीचतां धक्ष्यतसं न शुष्कम् ॥ ४ ॥
ud-agne tiṣṭha pratyātanuṣva nyamitrāguṁ oṣatāt-tigmahete ।
yono āratiguṁ samidhāna cakre nīcatāṁ dhakṣyatasaṁ na śuṣkam ॥ 4 ॥
4. Rise up O Agni, spread out before us, burn down our [mental] foes, you who have sharpened arrows. Blazing Agni! Consume completely like dried up stubble the one who seeks our detriment.

ऊर्ध्वो भव प्रति विध्याध्यस्मद्-विष्कृणुष्व दैवान्यग्ने ।
अव स्थिरा तनुहि या तुजूनां जामिम् अजामिं प्रमृणी हि शत्रून् ॥ ५ ॥
ūrdhvo bhava prati vidhyādhyasmad-viṣkṛṇuṣva daivānyagne ।
ava sthirā tanuhi yā tujūnāṁ jāmim ajāmiṁ pramṛṇī hi śatrūn ॥ 5 ॥
5. Rise O Agni, drive off those [mental] forces that obstruct us; manifest your own divine [wisdom] force. Slacken the strong bows of the malicious enemies [thoughts] whether kin [subjective] or stranger [objective].

स ते॑ जानाति सुम॒तिं यविष्ठ॒ य ईव॑ते॒ ब्रह्म॑णे गा॒तुम्-ऐर॑त् ।
विश्वा॑न्-यस्मै सु॒दिना॑नि रा॒यो द्यु॒म्नान्य॒र्यो विदुरो॑ अ॒भि-द्यौत् ॥ ६ ॥
sa te॑ jānāti sumaṯiṁ yaviṣṭha॒ ya īvaṯe॒ brahmaṇe॒ gāṯum-airaṯ ।
viśvā॑n-yasmai su॒dinā॑ni rā॒yo dyu॒mnānya॒ryo viduro॑ a॒bhi-dyau॑t ॥ 6 ॥

6. Most youthful God, he knows well your favour who gave an impulse to this high devotion. All good days and magnificence of riches have you beamed forth upon the gates of the spiritual aspirant.

सेद॑ग्ने॒ अस्तु सु॒भगः॑ सु॒दानु॒र्यस्त्वा॒ नित्ये॑न ह॒विषा॒ य उ॒क्तैः ।
पिप्री॑षति॒ स्व आयु॑षि दुरो॒णे विश्वे॑द॒स्मै सु॒दिना॒ सास॑दि॒ष्टिः ॥ ७ ॥
sedaग्ने॒ astu su॒bhagaḥ॑ su॒dānu॒r-yas-tvā॒ nityeṇa॑ ha॒viṣā॒ ya u॒ktaiḥ ।
piprī॑ṣati॒ sva āyu॑ṣi duro॒ṇe viśved-a॑smai su॒dinā॒ sāsa॑diṣṭhiḥ ॥ 7 ॥

7. Blessed O Agni, be the one, the generous giver, who with praises and regular oblations, tries to propitiate you for longevity and security. May all his days be bright; be this his longing.

अर्चा॑मि ते सु॒म॒तिं घो॒ष्य॒र्वाक् सं ते॑ वा॒वाता॑ जरताम् इ॒यं गीः ।
स्वश्वा॑स्त्वा सु॒रथा॑म् अर्जयेमा॒स्मे क्ष॒त्राणि॑ धारये॒र्-अनु॒ द्यून् ॥ ८ ॥
arcā॑mi te sumaṯiṁ ghoṣya॒rvāk saṁ te॑ vā॒vātā॑ jaratām i॒yaṁ gīḥ ।
svaśvā॑s- tvā su॒rathā॑m arjayemā॒sme kṣa॒trāṇi॑ dhāraye॒r-anu॒ dyūn ॥ 8 ॥

8. I praise your gracious favour; sing back in answer! May this my song, be like your beloved. Lord of good horses and vehicles may we glorify you, and day by day increase our [spiritual] dominion

इ॒ह त्वा॒ भूर्याचरे॒ दुपा॒त्मन् दो॒षावस्तर्दी॒दीवागुं॑स॒ मनु॒ द्यून् ।
क्रीड॑ङ्स्त्वा सु॒मन॑सः सपेमा॒भि द्यु॒म्ना त॑स्थि॒वागुं॑सो॒ जना॑नाम् ॥ ९ ॥
i॒ha tvā॒ bhūryācare॒ dupā॒tman doṣā॑vastar dīdī॒vāguṁsa॒ manu॒ dyūn ।
krīḍa॑ṁtas-tvā su॒mana॑sah॒ sapemā॒bhi dyu॒mnā ta॑sthi॒vāguṁso॒ jana॑nām ॥ 9 ॥

9. Here of free choice, let each one serve you opulently, resplendent day by day at sunrise and sunset. So may we honour you, content and joyous, ever expanding in glorious achievement.

यस्त्वा॒ स्वश्वः॑ सुहिर॒ण्यो अ॑ग्न उप॒याति॒ वसु॑मता॒ रथे॑न ।
तस्य॑ त्रा॒ता भ॑वसि॒ तस्य॒ सखा॒ यस्ते॑ आति॒थ्य मा॑नु॒षग्-जुजो॑षत ॥ १० ॥
yas-tvā॒ svaśvaḥ॑ suhiraṇyo a॑gna upa॒yāti॒ vasu॑matā॒ rathe॑na ।
tasya॑ trā॒tā bha॑vasi॒ tasya॒ sakhā॒ yasta॑ ā॒tithya mā॑nu॒ṣag-jujo॑ṣata ॥ 10 ॥

10. Whoever with good horses and fine gold, O Agni approaches you, on a cart laden with treasure, you are his protector, you are the friend of the one who delights in entertaining you.

म॒हो रु॑जामि ब॒न्धुता॒ वचो॑भि॒स्-तन्-मा॑ पि॒तुर्-गोत॑म॒-आदिन्वि॑याय ।
त्वङ्नो॑ अ॒स्य वच॑सश्-चिकिद्धि॒ होत॑र्-यविष्ठ सुक्रतो॒ दमू॑नाः ॥ ११ ॥
maho॒ rujāmi bandhutā॒ vacobhi॒s-tan-mā॑ pi॒tur-gotam-ādinvi॒yāya ।
tvaṁno॑ a॒sya vaca॑sas-cikiddhi॒ hotar॑-yaviṣṭha sukrato॒ damū॑nāḥ ॥ 11 ॥

11. Through word and kinship [with you] I destroy the mighty forces of chaos; this power I have received from Gotama my father. Take note of this our declaration, O Most Youthful, Friend of the House, Exceeding Wise, Invoker. You are the friend and the protector of the one who delights in entertaining you.

अस्वप्न॑-जस्-तरण॑यः सु॒शेवा॒ अत॑न्द्रासोऽवृ॒का अ॑श्रमिष्ठाः ।
ते पा॒यव॑ः स॒ध्रिय॑ं यो नि॒षद्-याग्ने॒ तव॑ नः पाङ्त्वमूर ॥ १२ ॥
asvapna॑-jas-tara॒ṇayaḥ su॒śevā॒ ata॑ndrāso'vṛ॒kā aśra॑miṣṭhāḥ ।
te pā॒yavaḥ॑ sa॒dhriya॑ṁ yo ni॒ṣad-yāgne॒ tava॑ naḥ pāṁtvamūra ॥ 12 ॥

12. Knowing no slumber, speedy and propitious, alert and ever friendly, most Unwearied One. May your protective powers combining, unerring Agni, be present here to preserve us.

ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान्त्-सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ १३ ॥
ye pāyavo māmateyaṁ te agne paśyanto andhaṁ duritād arakṣan ।
rarakṣa tānt-sukṛto viśvavedā dipsanta idripavo nāha debhuḥ ॥ 13 ॥
13. Your protective rays, O Agni, preserved ignorant Mamateya from transgression. Lord of all riches, they preserved the righteous; the forces of chaos who tried to harm them had no effect.

त्वया वयगुं सधन्यस्-त्वोता स्तव-प्रणीत्यश्याम वाजान् ।
उभाशगुं सा सूदय सत्यताते नुष्टुया कृणुह्या ह्याण ॥ १४ ॥
tvayā vayaguṁ sadhanyas-tvotā stava-praṇītyaśyāma vājān ।
ubhāśaguṁ sā sūdaya satyatāte nuṣṭhuyā kṛṇuhyā hṛyāṇa ॥ 14 ॥
14. Aided by you may we become prosperous, may we become strong, with you to guide us onwards. O Ever Truthful One, grant us this world and the next, do this, O God whom power emboldens.

अयाते अग्ने समिधा विधेम प्रति स्तोमगुं शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्र-महो अवद्यात् ॥ १५ ॥
ayāte agne samidhā vidhema prati stomaguṁ śasyamānaṁ gṛbhāya ।
dahāśaso rakṣasaḥ pāhyasmān druho nido mitra-maho avadyāt ॥ 15 ॥
15. O Agni with this fuel will we serve you; accept with favour the praise we sing to you. Destroy the forces of chaos and preserve us, O Friend, from deceit, scorn and slander. (RV.4.4.1-15)

रक्षोहणं वाजिनम् आजिघर्मि मित्रं प्रतिष्ठम् उपयामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः सनो दिवा सरिषः पातु नक्तम् ॥ १६ ॥
rakṣohaṇaṁ vājinam ājigharmi mitraṁ pratiṣṭham upayāmi śarma ।
śiśāno agniḥ kratubhis samiddhas sano divā sariṣaḥ pātu naktam ॥ 16 ॥
16. I offer ghee to the Mighty Slayer of the forces of Chaos; to the most Famous Friend I come for refuge. Enkindled, impassioned by our rites, may Agni protect us from all negativity during the day and the night. (RV.10.87.1)

वि ज्योतिषा बृहता भात्यग्निरावि-र्विश्वानि कृणुते महित्वा ।
प्रादेविर्मायास् सह ते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥
उत स्वानासो दिवि षन्त्वग्नेस्तिग्मायुधा रक्षसे हन्त्वा उ ॥ १७ ॥
vi jyotiṣā bṛhatā bhātyagnir-āvir-viśvāni kṛṇute mahitvā ।
prādevir-māyās saha te durevāś śiśīte śṛṅge rakṣase vinikṣe ॥
uta svānāso divi ṣantvagnes tigmāyudhā rakṣase hantavā u ॥ 17 ॥
17. Blessed O Agni be the one, the liberal giver of charity, who with praises and regular oblations, tries to propitiate you for longevity and security, may all his days be bright; may this blessing be his.

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितो ऽवधीर् हविष्मन्तो नमसा विधेम ते ॥
mā nas stoke tanaye mā na āyuṣi mā no goṣu mā no aśveṣu rīriṣaḥ ।
vīrān mā no rudra bhāmito ’vadhīr haviṣmanto namasā vidhema te ॥
O Rudra, harm us not in our babies and in our children, harm us not in the living, in our cows or horses, Slay not our heroes in the fury of your anger. Bringing oblations evermore we pay our obeisance to you

Aparājita mantra

ॐ नमो भगवते अनन्ताय । सहस्र शीरषाय सुगन्ध क्षीरार्णव शायिने । शेष भोग पर्यङ्काय गरुड-वाहनाय वासुदेवाय नमः । पीत वाससे सङ्कर्शण । प्रद्युम्न अनिरुद्ध हयशीर्ष, वाराह नारसिंह वामन, त्रिविक्रम राम राम राम

कृष्ण पर-ब्रह्म नमोऽस्तु ते ॥

oṁ namo bhagavate anantāya । sahasra śīraṣāya sugandha kṣīrārṇava śāyine । śeṣa bhoga paryaṅkāya garuḍa-vāhanāya vāsudevāya namaḥ । pīta vāsase saṅkarśaṇa । pradyumna aniruddha hayaśīrṣa, vārāha nārasiṁha vāmana, trivikrama rāma rāma rāma kṛṣṇa para-brahma namo'stu te ॥

असुर दैत्य यक्ष राक्षस भूत पिशाच, सिद्धि योगिनि डाकिनि ब्रह्म-राक्षस विनायक, पूतना रेवती स्कन्द पूर्वोगम ग्रह नक्षत्र गृहाण गृहाण । महा ग्रह गृहाण । हण हण । दह दह । पच्छ पच्छ । मद मद । पातय पातय । अख्यात अख्यात । गृहाण गृहाण । आविश आविश । ध्वंसि ध्वंसि । त्रासय त्रासय । द्रह्य द्रह्य चक्रेण गदाया वक्रेण भस्म कुरु ॥

ॐ विमलायै चामर-हस्तायै नमः । उत्कर्षिण्यै चामर-हस्तायै । ज्ञानायै चामर-हस्तायै । क्रियायै चामर-हस्तायै । प्रह्व्यै चामर-हस्तायै । सत्यायै चामर-हस्तायै । ईशानायै चामर-हस्तायै । योगायै चामर-हस्तायै । अनुग्रहायै चामर-हस्तायै ॥

oṁ vimalāyai cāmara-hastāyai namaḥ । utkarṣiṇyai cāmara-hastāyai । jñānāyai cāmara-hastāyai । kriyāyai cāmara-hastāyai । prahvyai cāmara-hastāyai । satyāyai cāmara-hastāyai । īśānāyai cāmara-hastāyai । yogāyai cāmara-hastāyai । anugrahāyai cāmara-hastāyai ॥

ॐ जगत्-प्रकृतये दिव्य योग-पीठाय नमः । दिव्य योग पर्यङ्काय । सहस्र-शीर्षाय अनन्त नाग-राजाय । पुरतः भगवद् पाद-पीठाय । भगवत्-पादुकाभ्यां ॥

oṁ jagat-prakṛtaye divya yoga-pīṭhāya namaḥ । divya yoga paryaṅkāya । sahasra-śīrṣāya ananta nāga-rājāya । puratah bhagavad pāda-pīṭhāya । bhagavat-pādukābhyāṁ ॥

RATNA NYĀSAM

❖ *Five or nine gems are now placed in the cavity in the pīṭham — if the gems are unavailable then a single pearl is subsituted.*

brahma śīla — त्वमेव परमा शक्तिस् त्वमेवासन धारिका । देवाज्ञया त्वया देवि स्थातव्यम् इह सर्वदा ॥
tvam eva paramā śaktis tvamevāsana dhārikā ।
devājñayā tvayā devi sthātavyam iha sarvadā ॥
You are the supreme power, the supporter of the seat. By the command of the gods, O Goddess, you must always remain here.

ratnāni — स्थितं चराचरं यस्यां रत्नानां निधिरव्ययः । सा त्वं ब्रह्म-शीला रूपा तिष्ठात्र धरणि स्थिरा ॥

sthitaṁ carācaraṁ yasyāṁ ratnānāṁ nidhir avyayaḥ ।
sā tvaṁ brahma-śīlā rūpā tiṣṭhātra dharaṇi sthirā ॥

You, in whom resides the entire movable and immovable creation, and who is the inexhaustible treasure of gems; assuming the form of the Brahma-shila, O steady Earth, remain here.

YANTRA STHĀPANAM

❖ *The respective yantras of the deities are also inserted in the cavities after the appropriate consecration.*



MŪRTI STHĀPANAM

❖ *The bera is now taken into the temple and fixed to the pedastal with aṣṭha-bandhanam.*

आ त्वाऽहर्षम् अन्तरेधि ध्रुवास् तिष्ठा विचाचलिः ।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद् राष्ट्रमधि भ्रशत ॥ १ ॥
ā tvā'harṣam antaredhi dhruvās tiṣṭhā vicācaliḥ ।
viśastvā sarvā vāñchantu mā tvad rāṣṭramadhi bhraśata ॥ 1 ॥
BE with us; I have chosen you: stand steadfast and immovable.
Let all the people wish for you let not your kingship fall away.

इहैवैधि मापच्योष्ठाः पर्वत इवा विचाचलिः । इन्द्र इवेह ध्रुवस् तिष्ठेह राष्ट्रं उ धारय ॥ २ ॥
ihaivaidhi māpa cyoṣṭhāḥ parvata ivā vicācaliḥ ।
indra iveha dhruvas tiṣṭheha rāṣṭraṁ u dhāraya ॥ 2 ॥
Be even here; fall not away be like a mountain unremoved.
Stand steadfast here like Indra's self, and hold the kingship in the grasp.

इमम् इन्द्रो अदीधरत् ध्रुवं ध्रुवेण हविषा। तस्मै सोमो अधि ब्रवत् तस्मा उ ब्रह्मणस्पतिः ॥ ३ ॥
imam indro adīdharat dhruvaṁ dhruveṇa haviṣā ।
tasmai somo adhi bravat tasmā u brahmaṇaspatiḥ ॥ 3 ॥
This man has Indra established, made secure by strong oblation's power.
May Soma and Brahmanaspati pronounce a benediction on him.

ध्रुवा द्यौर् ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वम् इदं जगद् ध्रुवो राजा विशामयम् ॥ ४ ॥
dhruvā dyaur dhruvā pṛthivī dhruvāsaḥ parvatā ime ।
dhruvaṁ viśvam idaṁ jagad dhruvo rājā viśāmayam ॥ 4 ॥

Firm is the sky and firm the earth, and steadfast also are these hills.
Steadfast is all this living world, and steadfast is this King of men.

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः । ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥ ५ ॥
dhruvaṁ te rājā varuṇo dhruvaṁ devo bṛhaspatiḥ ।
dhruvaṁ ta indraścāgniśca rāṣṭraṁ dhārayatāṁ dhruvam ॥ 5 ॥

Steadfast, may Varuna the King, steadfast, the God Brhaspati,
Steadfast, may Indra, steadfast too, may Agni keep your steadfast reign.

❖ *Offer an umbrella with the mantra;*

ॐ प्रजापतेः शरणमसि । ब्रह्मणश्छदिर्-विश्व जनस्य छायासि सर्वतो मा पाहि ॥
oṁ prajāpateḥ śaraṇam asi । brahmaṇaścchadir-viśva janasya chāyāsi sarvato mā pāhi ॥

"Om, you are the refuge of Prajapati. You are the protection of Brahma and the shade for all beings. Protect me from all sides."

❖ *Then the yajamana gives go-dānam*

GO-DĀNAM

Saṅkalpaḥ — गोविन्द .....अमुक पक्षे अमुक तिथौ अमुक गोत्रो अमुक शर्मा अहं कृतैतद् भगवत् प्रतिष्ठा सिद्ध्यर्थं सुवर्ण शृङ्गी रौप्यखुरीं ताम्र पृष्ठीं प्रवालोष्ठिं मुक्ता पुच्छीं स-वत्सां कांस्य दोहनाम् इमां गां _____ गोत्राय _____ शर्मणे ब्राह्मणाय तुभ्यं संप्रददे ॥
govinda .....amuka pakṣe amuka tithau amuka gotro amuka śarmā ahaṁ kṛtaitad bhagavat pratiṣṭhā siddhyarthaṁ suvarṇa śṛṅgī raupyakhurīṁ tāmra pṛṣṭhīṁ pravāloṣṭhiṁ muktā pucchīṁ sa-vatsāṁ kāṁsya dohanām imāṁ gāṁ _____ gotrāya _____ śarmaṇe brāhmaṇāya tubhyaṁ saṁpradade ॥

Govinda! On [specific lunar fortnight], on [specific lunar day], I, [your Gotra] [your name], for the successful completion of this consecration ceremony, offer this cow—adorned with golden horns, silver hooves, a copper back, coral lips, a pearl tail, along with her calf, and a bronze milking vessel—to the Brahmin [recipient's Gotra] [recipient's name].

❖ *Give jal-akṣata in the brahmin's hand from the deva-tirtham.*

कृतैतद् गोदान प्रतिष्ठार्थं साद्-गुणार्थं इदं हिरण्यं _____ गोत्राय _____ शर्मणे संप्रददे ॥
kṛtaitad godāna pratiṣṭhārthaṁ sād-guṇārthaṁ idaṁ hiraṇyaṁ _____ gotrāya _____ śarmaṇe saṁpradade ॥

❖ *Light a lamp, close the curtain and the door to the garbha-griha.*

SUDARŚANA HOMAM

❖ *Pprepare a kalaśa and invoke Lord Sudarśana;*

शङ्खं चक्रं च चापं परशुं असिमिशुं शूल पाशां कुशांश्च । बिभ्रानम् वज्र केटं हल मुसुल गदा कुण्टं अत्युग्र दंष्ट्रं ॥
śaṅkhaṁ cakraṁ ca cāpaṁ paraśuṁ asimiśuṁ śūla pāśāṁ kuśāṁśca ।
bibhrānam vajra keṭaṁ hala musula gadā kuṇṭaṁ atyugra daṁṣṭraṁ ॥
ज्वाला केशं त्रिनेत्रं ज्वलदानल निभं हार केयूर भूषम् । ध्यायेत् शट्कोन संस्थं सकल रिपु-कुल प्राण संहार चक्रम् ॥
jvālā keśaṁ trinetraṁ jvaladānala nibhaṁ hāra keyūra bhūṣam ।
dhyāyet śaṭkona saṁsthaṁ sakala ripu-kula prāṇa saṁhāra cakram ॥

I visualize Sudarshana the eliminator of all hostile forces, located within the six-cornered star, bearing the conch, discus, bow, axe, sword, trident, noose, goad, the diamond-shield, plough, cudgel, mace, spear, with aweful sharp fangs, with blazing halo, three eyes, the intensity of a raging inferno, adorned with garlands and anklets.

ॐ सहस्रार हुं फट् oṁ sahasrāra huṁ phaṭ

❖ *Place flower and water on top of the kalaśa;*

ॐ नमः सुदर्शनाय आगच्छ आगच्छ [
oṁ namaḥ sudarśanāya āgaccha āgaccha [3 times]

❖ *offer āsanam then do nyāsa on the kalaśa.*

ॐ आचक्राय स्वाहा ज्ञानाय नमः
oṁ ācakrāya svāhā jñānāya namaḥ [*heart*]
ॐ विचक्राय बलाय स्वाहा
oṁ vicakrāya balāya svāhā [*head*]
ॐ सुचक्राय वीर्याय वषट्
oṁ sucakrāya vīryāya vaṣaṭ [*sikhā*]
ॐ सूर्य चक्राय स्वाहा ऐश्वर्याय हुं
oṁ sūrya cakrāya svāhā aiśvaryāya huṁ [*shoulders*]
ॐ ज्वाल-चक्राय स्वाहा तेजसे फट्
oṁ jvāla-cakrāya svāhā tejase phaṭ [*eyes*]
ॐ महा सुदर्शन चक्राय स्वाहा शक्त्यै वौषट्।
oṁ mahā sudarśana cakrāya svāhā śaktyai vauṣaṭ.

*[snap fingers around the kalaśa and show **cakra mudra**, **dhenu mudra** and **yoni mudra**.]*

Offer all the upacāras; पुष्पैः पूजयामि — ॐ श्री सुदर्शनाय नमः । चक्र-राजाय । तेजो-व्युहाय । महा-द्युताय । सहस्र-बाहवे । दीप्ताङ्गाय । अरुणाक्षाय । प्रतापवते । अनेकादित्य-सङ्काशाय । प्रोर्ध्व-ज्वल-भिरञ्जिताय । सौदामणि-सहस्राभाय । मणि-कुण्डल-शोभिताय । पञ्च-भूत-मनो-रूपाय । षट्-कोणान्तर-संस्थिताय । हरान्त-कारणोद्भुत-रोष-भीषन-विग्रहाय । हरि-पाणि-लसत्-पद्म-विहार-मनोहराय ॥

arghyam etc. puṣpaiḥ pūjayāmi — oṁ śrī sudarśanāya namaḥ । cakra-rājāya । tejo-vyuhāya । mahā-dyutāya । sahasra-bāhave । dīptāṅgāya । aruṇākṣāya । pratāpavate । anekāditya-saṅkāśāya । prordhva-jvala-bhirañjitāya । saudāmaṇi-sahasrābhāya । maṇi-kuṇḍala-śobhitāya । pañca-bhūta-mano-rūpāya । ṣaṭ-koṇāntara-saṁsthitāya । harānta-kāraṇodbhuta-roṣa-bhīṣana-vigrahāya । hari-pāṇi-lasat-padma-vihāra-manoharāya ॥

धूपम् । दीपम् । नैवेद्यम् । ताम्बूलम् । फलम् । कर्पूर निराजनम् ।
ॐ सुदर्शनाय विद्महे । हेति-राजाय धीमहि । तन्नस् चक्र प्रचोदयात् ॥
dhūpam । dīpam । naivedyam । tāmbūlam । phalam । karpūra nirājanam ।
oṁ sudarśanāya vidmahe । heti-rājāya dhīmahi । tannas cakra pracodayāt ॥

सुदर्शनं महा चक्र गोविन्दस्य करायुध । तीक्ष्ण धार महावेग सूर्य कोटि समप्रभा ॥
sudarśanaṁ mahā cakra govindasya karāyudha ।
tīkṣṇa dhāra mahāvega sūrya koṭi samaprabhā ॥

I meditate upon the Sudarshana, the great discus, the weapon held in the hand of Govinda (Krishna). With sharp edges and immense speed, it shines with the brilliance of a crore (ten million) suns

❖ *Prepare the Kuṇḍa and perform all the preliminaries according to the nitya homa vidhi and then proceed with the main oblations.*

1. mūla mantra

2. māla mantra

ॐ क्लिं कृष्णाय गोविन्दाय गोपिजनवल्लभाय पराय परम पुरुषाय परमात्मने, पर-कर्म मन्त्र यन्त्र तन्त्र औषधयः अस्त्र शस्त्राणि संहर संहर, मृत्योर् मोक्षय मोक्षय, ॐ नमो भगवते महा-सुदर्शनाय दीप्त्रे ज्वाल परीताय, सर्व-दिक् क्षोभण-कराय हुं फट् ब्रह्मणे परम ज्योतिषे स्वाहा ॥

oṁ kliṁ kṛṣṇāya govindāya gopijanavallabhāya parāya parama puruṣāya paramātmane, para-karma mantra yantra tantra auṣadhayaḥ astra śastrāṇi saṁhara saṁhara, mṛtyor mokṣaya mokṣaya, oṁ namo bhagavate mahā-sudarśanāya dīptre jvāla parītāya, sarva-dik kṣobhaṇa-karāya huṁ phaṭ brahmaṇe parama jyotiṣe svāhā ॥

3. gāyatri 1

ॐ सुदर्शनाय विद्महे । हेतिराजाय धीमहि । तन्नस् चक्र प्रचोदयात् ॥
oṁ sudarśanāya vidmahe । hetirājāya dhīmahi । tannas cakra pracodayāt ॥

4. śakti grāsa mantra

ॐ प्रं महा-सुदर्शन चक्रराज महा-ध्वग अस्तगत, सर्व दुष्ट भयङ्कर छिन्धि छिन्धि, भिन्धि भिन्धि, विदारय विदारय, पर-मन्त्रान् ग्रस ग्रस, भक्षय भक्षय, भूतानि त्रासय त्रासय, हुं फट् स्वाहा ॥

Oṁ praṁ mahā-sudarśana cakrarāja mahā-dhvaga astagata, sarva duṣṭa bhayaṅkara chindhi chindhi, bhindhi bhindhi, vidāraya vidāraya, para-mantrān grasa grasa, bhakṣaya bhakṣaya, bhūtāni trāsaya trāsaya, huṁ phaṭ svāhā ॥

5. abhaya narasiṁha mantra

ॐ नमो भगवते नरसिंहाय, नमस् तेजस् तेजसे, आविराविर् भव, वज्र नख वज्र दंष्ट्र, कर्माशयान् रन्धय रन्धय, तमो ग्रस ग्रस स्वाहा, अभयम् आत्मनि भूयिष्ठा ॐ क्ष्रौं - स्वाहा ॥

oṁ namo bhagavate narasiṁhāya, namas tejas tejase, āvir āvir bhava, vajra nakha vajra daṁṣṭra, karmāśayān randhaya randhaya, tamo grasa grasa svāhā, abhayam ātmani bhūyiṣṭhā oṁ kṣrauṁ - svāhā ॥

PARAÑJYOTI HOMAḤ

❖ *In the evening the ritviks assemble in the yāga śāla and perform Viśvaksena Pūjā and puṇyāha vācanam.*

Sankalpam — ॐ एवं पूर्वोक्त गुण विशेषण विसिष्ठायां अस्यां शुभ तिथौ श्री भगवद् आज्ञया भगवद् कैङ्कर्य रूपेण अस्मिन् बिम्बे परञ्ज्योतिर् आगमनार्थं नाना सूक्तैः नाना मन्त्रैः होमं होष्यामि ॥

oṁ evaṁ pūrvokta guṇa viśeṣaṇa visiṣṭhāyāṁ asyāṁ śubha tithau śrī bhagavad ājñayā bhagavad kaiṅkarya rūpeṇa asmin bimbe parañjyotir āgamanārthaṁ nānā sūktaiḥ nānā mantraiḥ homaṁ hoṣyāmi ॥

Om. On this auspicious day, endowed with the aforementioned virtues and qualities, by the divine command of the Lord and in the spirit of service to the divine, I shall perform the fire sacrifice (homa) with various hymns and mantras in order to invite the supreme effulgence (Paranjyoti) into this icon (bimba).

Agnimukham

❖ *Starting in the east, ignite fire in each of the kundas invoking the following;*

East kunda —	वासुदेव	Vāsudeva
South Kunda —	सङ्कर्षण	Saṅkarṣaṇa
West kunda —	प्रद्युम्न	Pradyumna
North kunda —	अन्निरुद्ध	Anniruddha

Brahma varaṇam

Saṅkalpaḥ — अद्य भगवद् प्रतिष्ठ होम कर्मणि कृताकृतावेक्षणादि ब्रह्म कर्म कर्तुं ..... शर्माणं ब्रह्मत्वेन त्वाम् अहम् वृणे । ॐ वृतोऽस्मि ॥

adya bhagavad pratiṣṭha homa karmaṇi kṛtākṛtāvekṣaṇādi brahma karma kartuṁ ..... śarmāṇaṁ brahmatvena tvām aham vṛṇe | oṁ vṛto'smi ||

Today, for the purpose of performing the ritual of Bhagavad Pratishtha (installation of the deity) through the Homa (fire ritual) and associated acts such as the inspection of completed and incomplete tasks (Kritakritavekshanadi Brahma Karma), I appoint [insert name] Sharma as the presiding Brahman priest. Om! You have been chosen!

यथा चतुर्-मुखो ब्रह्मा सर्व-वेद धरः प्रभुः । तथा त्वं अस्मिन् यज्ञे ब्रह्म भव द्विजोत्तम ॥
yathā catur-mukho brahmā sarva-veda dharaḥ prabhuḥ |
tathā tvaṁ asmin yajñe brahma bhava dvijottama ||

Just as the four-faced Brahma, the lord who upholds all the Vedas, presides, so too, O best among the twice-born (Dvijottama), may you assume the role of Brahma in this sacrifice (Yajna).

PRADHĀNA HOMAḤ

1. PURUSA SŪKTA HOMA

१. ॐ सहस्र शीर्षा पुरुषः । सहस्राक्षः सहस्र पात् । स भूमिं विश्वतो वृत्वा । अत्य-तिष्ठद् दशाङ्गुलं स्वाहा ॥
1. oṁ sahasra śīrṣā puruṣaḥ | sahasrākṣaḥ sahasra pāt |
sa bhūmiṁ viśvato vṛtvā | atya-tiṣṭhad daśāṅgulaṁ svāhā ||

२. ॐ पुरुष एवेदगुं सर्वं । यद् भूतं यच्च भव्यम् । उतामृतत्व स्येशानः । यद् अन्नेना-तिरोहति स्वाहा ॥
2. oṁ puruṣa evedaguṁ sarvaṁ | yad bhūtaṁ yac ca bhavyam |
utāmṛtatva syeśānaḥ | yad annenā-tirohati svāhā ||

३. ॐ एतावानस्य महिमा । अतो ज्यायागुंश्च पूरुषः । पादोऽस्य विश्वा भूतानि । त्रिपाद् अस्यामृतं दिवि स्वाहा ॥
3. oṁ etāvān asya mahimā | ato jyāyāguṁś ca pūruṣaḥ |
pādo'sya viśvā bhūtāni | tripād asyāmṛtaṁ divi svāhā ||

४. ॐ त्रिपाद् ऊर्ध्व उदैत् पुरुषः । पादोऽस्येहाभवात् पुनः । ततो विश्वङ् व्यक्रामत् । साशनानशने अभि स्वाहा ॥
4. oṁ tripād ūrdhva udait puruṣaḥ | pādo'syehābhavāt punaḥ |
tato viśvaṅ vyakrāmat | sāśanānaśane abhi svāhā ||

५. ॐ तस्माद्विराड् अजायत । विराजो अधि पुरुषः । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरस्स्वाहा ॥
5. oṁ tasmād virāḍ ajāyata | virājo adhi puruṣaḥ |
sa jāto atyaricyata | paścād bhūmim atho puras svāhā ||

६. ॐ यत् पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यं । ग्रीष्म इध्मः शरधविस्स्वाहा ॥
6. oṁ yat puruṣeṇa haviṣā | devā yajñam atanvata |
vasanto asyāsīd ājyaṁ | grīṣma idhmaḥ śarad havis svāhā ||

७. ॐ सप्तास्यासन् परिधयः । त्रिः सप्त समिधः कृताः । देवा यद् यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुं स्वाहा ॥
7. oṁ saptāsyāsan paridhayaḥ | triḥ sapta samidhaḥ kṛtāḥ |
devā yad yajñaṁ tanvānāḥ | abadhnan puruṣaṁ paśum svāhā ||

८. ॐ तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातम् अग्रतः । तेन देवा अयजन्त । साध्या ऋषयश्च ये स्वाहा ॥
8. oṁ taṁ yajñaṁ barhiṣi praukṣan | puruṣaṁ jātam agrataḥ |
tena devā ayajanta | sādhyā ṛṣayaś ca ye svāhā ||

९. ॐ तस्माद्यज्ञात् सर्व हुतः । सम्भृतं पृषद् आज्यम् । पषूगुंस्तागुंश्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये स्वाहा ॥
9. oṁ tasmād yajñāt sarva hutaḥ | sambhṛtaṁ pṛṣad ājyam |
paṣūguṁs tāguṁś cakre vāyavyān | āraṇyān grāmyāśca ye svāhā ||

१०. ॐ तस्माद्यज्ञात् सर्व हुतः । ऋचः सामानि जज्ञिरे । छन्दागुंसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत स्वाहा ॥
10. oṁ tasmād yajñāt sarva hutaḥ | ṛcaḥ sāmāni jajñire |
chandāguṁsi jajñire tasmāt | yajus tasmād ajāyata svāhā ||

११. ॐ तस्मादश्व अजायन्त । ये के चोभयादतः । गवो ह जज्ञिरे तस्मात् । तस्माज्जाता अजा वयस्स्वाहा ॥
11. oṁ tasmād aśva ajāyanta | ye ke cobhayādataḥ |
gavo ha jajñire tasmāt | tasmāj jātā ajā vayas svāhā ||

१२. ॐ यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । का वूरू पादावुच्येते स्वाहा ॥
12. oṁ yat puruṣaṁ vyadadhuḥ | katidhā vyakalpayan |
mukhaṁ kim asya kau bāhū | kā vūrū pādāv ucyete svāhā ||

१३. ॐ ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः । पद्भ्यागुं शूद्रो अजायत स्वाहा ॥
13. oṁ brāhmaṇo'sya mukham āsīt | bāhū rājanyaḥ kṛtaḥ |
ūrū tad asya yad vaiśyaḥ | padbhyāguṁ śūdro ajāyata svāhā ||

१४. ॐ चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुर् अजायत स्वाहा ॥
14. oṁ candramā manaso jātaḥ | cakṣoḥ sūryo ajāyata |
mukhād indraś cāgniś ca | prāṇād vāyur ajāyata svāhā ||

१५. ॐ वेदाहमेतं पुरुषं महान्तम् । आदित्य वर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्यदास्ते स्वाहा ॥
15. oṁ vedāham etaṁ puruṣaṁ mahāntam | āditya varṇaṁ tamasas tu pāre |
sarvāṇi rūpāṇi vicitya dhīraḥ | nāmāni kṛtvā'bhivadan yadāste svāhā ||

१६. ॐ धाता पुरस्ताद्यम् उदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः ।
तम् एवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते स्वाहा ॥
16. oṁ dhātā puras tād yam udājahāra | śakraḥ pravidvān pradiśaś-catasraḥ |
tam evaṁ vidvān amṛta iha bhavati | nānyaḥ panthā ayanāya vidyate svāhā ||

१७. ॐ यज्ञेन यज्ञम् अयजन्त देवाः । तानि धर्माणि प्रथमा-न्यासन्
ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे साध्यास् सन्ति देवास्स्वाहा
17. oṁ yajñena yajñam ayajanta devāḥ | tāni dharmāṇi prathamā-nyāsan
te ha nākaṁ mahimānas sacante | yatra pūrve sādhyās santi devās svāhā ||

2. NĀRĀYAṆA SŪKTA HOMA

सहस्र-शीर्षं देवं विश्वाक्षं विश्व-शंभुवम् । विश्वं नारायणं देवम्-अक्षरं परमं पदम् ॥ १ ॥
sahasra-śīrṣaṁ devaṁ viśvākṣaṁ viśva-śaṁbhuvam |
viśvaṁ nārāyaṇaṁ devam-akṣaraṁ paramaṁ padam ॥ 1 ॥

विश्वतः परमान्-नित्यं विश्वं नारायणगुं हरिम् । विश्वम् एवेदं पुरुषस्तद् विश्वम् उपजीवति ॥ २ ॥
viśvataḥ paramān-nityaṁ viśvaṁ nārāyaṇaguṁ harim |
viśvam evedaṁ puruṣastad viśvam upajīvati ॥ 2 ॥

पतिं विश्वस्यात्मेश्वरगुं शाश्वतगुं शिवम् अच्युतम् । नारायणं महा-ज्ञेयं विश्वात्मानं परायणम् ॥ ३ ॥
patiṁ viśvasyātmeśvaraguṁ śāśvataguṁ śivam acyutam |
nārāyaṇaṁ mahā-jñeyaṁ viśvātmānaṁ parāyaṇam ॥ 3 ॥

नारायण परो ज्योतिर्-आत्मा नारायणः परः । नारायण परं-ब्रह्म तत्त्वं नारायणः परः ॥ ४ ॥
nārāyaṇa paro jyotir-ātmā nārāyaṇaḥ paraḥ |
nārāyaṇa paraṁ-brahma tattvaṁ nārāyaṇaḥ paraḥ ॥ 4 ॥

नारायण परो ज्योतिर्-आत्मा नारायण परः । नारायण परो ध्याता ध्यानं नारायणः परः ॥ ५ ॥
nārāyaṇa paro jyotir-ātmā nārāyaṇa paraḥ |
nārāyaṇa paro dhyātā dhyānaṁ nārāyaṇaḥ paraḥ ॥ 5 ॥

यच्च किञ्चित् जगत् सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः ॥ ६ ॥

yacca kiñcit jagat sarvaṁ dṛśyate śrūyate'pi vā ।
antarbahiśca tat sarvaṁ vyāpya nārāyaṇaḥ sthitaḥ ॥ 6 ॥

अनन्तम् अव्ययं कविगुं समुद्रेन्तं विश्व शंभुवम् । पद्म कोश प्रतीकाशगुं हृदयं चाप्यधोमुखम् ॥ ७ ॥
anantaṁ avyayaṁ kaviguṁ samudrentaṁ viśva śaṁbhuvam ।
padma kośa pratīkāśaguṁ hṛdayaṁ cāpyadhomukham ॥ 7 ॥

अधो निष्ट्या वितस्त्यान्ते नाभ्याम् उपरि तिष्ठति । ज्वाल-माला-कुलं भाती विश्वस्यायतनं महत् ॥ ८ ॥
adho niṣṭyā vitastyānte nābhyām upari tiṣṭhati ।
jvāla-mālā-kulaṁ bhātī viśvasyāyatanaṁ mahat ॥ 8 ॥

सन्ततगुं शिलाभिस्तु लम्बत्या कोश सन्निभम् । तस्यान्ते सुषिरगुं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ॥ ९ ॥
santataguṁ śilābhistu lambatyā kośa sannibham ।
tasyānte suṣiraguṁ sūkṣmaṁ tasmin sarvaṁ pratiṣṭhitam ॥ 9 ॥

तस्यमध्ये महन्-अग्निर् विश्वार्चिर् विश्वतो-मुखः । सोऽग्रभुग् विभजन् तिष्ठन्नाहारम् अजरः कविः ॥ १० ॥
पुरुषाय नारायणाय स्वाहा । पुरुषाय नारायणायेदं न मम ।
tasya madhye mahan-agnir viśvārcir viśvato-mukhaḥ ।
so'grabhug vibhajan tiṣṭhan nāhāram ajaraḥ kaviḥ ॥ 10 ॥

तीर्यग् ऊर्ध्वं अधश्शायी रश्मयस् तस्य सन्तता । सन्तापयति स्वं देहम् आपाद तल-मस्तकः ॥
तस्य मध्ये वह्निं शिखा अणीयोर्ध्वा व्यवस्थितः ॥ ११ ॥
tīryag ūrdhvaṁ adhaśśāyī raśmayas tasya santatā ।
santāpayati svaṁ deham āpāda tala-mastakaḥ ।।
tasya madhye vahni śikhā aṇīyordhvā vyavasthitaḥ ॥ 11 ॥

नील-तोयद मध्यस्थाद् विद्युल्लेखेव भास्वरा । नीवार शूकवत् तन्वी पीता भास्वत्यणूपमा ॥ १२ ॥
nīla-toyada madhyasthād vidyullekheva bhāsvarā ।
nīvāra śūkavat tanvī pītā bhāsvatyaṇūpamā ॥ 12 ॥

तस्याः शिखाय मध्ये परमात्माव्यवस्थितः । स ब्रह्म स शिवस्स हरिस्सेन्द्र सोऽक्षरः परमस्स्वराट् ॥ १३ ॥
tasyāḥ śikhāya madhye paramātmā vyavasthitaḥ ।
sa brahma sa śivas sa haris sendra so'kṣaraḥ paramas svarāṭ ॥ 13 ॥

ऋतगुं सत्यं परं ब्रह्म पुरुषं कृष्ण पिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥ १४ ॥
ṛtaguṁ satyaṁ paraṁ brahma puruṣaṁ kṛṣṇa piṅgalam ।
ūrdhvaretaṁ virūpākṣaṁ viśvarūpāya vai namo namaḥ ॥ 14 ॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥ १५ ॥
oṁ nārāyaṇāya vidmahe vāsudevāya dhīmahi । tanno viṣṇuḥ pracodayāt ॥ 15 ॥

3. VIṢṆU SŪKTA HOMA

विष्णोर् नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि यो अस्कभायद् उत्तरꣳ सधस्थं विचक्रमाणस् त्रेधो रुगायो विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रेस्थो विष्णोस्यूरसि विष्णो ध्रुवमसि वैष्णवमसि विष्णवे त्वा स्वाहा । विष्णवे इदं न मम ॥ १ ॥
viṣṇor nukaṁ vīryāṇi pravocaṁ yaḥ pārthivāni vimame rajāgmꣳ si yo askabhāyad uttaragmꣳ sadhastham vicakramāṇas tredho rugāyo viṣṇo rarāṭamasi viṣṇoḥ pṛṣṭhamasi viṣṇoḥ śñaptrestho viṣṇos yūrasi viṣṇo dhruvam asi vaiṣṇavam asi viṣṇave tvā svāhā । viṣṇave idaṁ na mama ॥ 1 ॥

तद् अस्य प्रियम् अभिपाथो अश्याम्। नरो यत्र देवयवो मदन्ति। उरुक्रम् अस्य स हि बन्धुर् इत्था विष्णोः पदो परमे मध्व उत्सस् स्वाहा। विष्णवे इदं न मम ॥ २ ॥

tad asya priyam abhipātho aśyām । naro yatra devayavo madanti ।urukram asya sa hi bandhur itthā viṣṇoḥ pado parame madhva uthsas svāhā । viṣṇave idaṁ na mama ॥ 2 ॥

प्रस्तद् विष्णुस् तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः। योस्योरुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा स्वाहा। विष्णवे इदं न मम ॥ ३ ॥

prastad viṣṇus tavate vīryāya । mṛgo na bhīmaḥ kucaro giriṣṭhāḥ । yosyoruṣu triṣu vikramaṇeṣu । adhikṣiyanti bhuvanāni viśvā svāhā । viṣṇave idaṁ na mama ॥ 3 ॥

परो मात्रया तनुवा वृधान। न ते महित्वम् अन्वश्नुवन्ति। उभे ते विद्म रजसि पृथिव्या। विष्णो देवत्वम् परमस्य विथ्से स्वाहा। विष्णवे इदं न मम ॥ ४ ॥

paro mātrayā tanuvā vṛdhāna । na te mahitvam anvaśnuvanti । ubhe te vidma rajasi pṛthivyā । viṣṇo devatvam paramasya vithse svāhā । viṣṇave idaṁ na mama ॥ 4 ॥

विचक्रमे पृथिवीम् एष एताम्। क्षेत्राय विष्णुर्मनुषे दशस्यन्। ध्रुवासो अस्य कीरयो जनासः। उरुक्षितगँ् सुजनिम् आचकार स्वाहा । विष्णवे इदं न मम ॥ ५ ॥

vicakrame pṛthivīm eṣa etām । kṣetrāya viṣṇur manuṣe daśasyan । dhruvāso asya kīrayo janāsaḥ । urukṣitagm̐ sujanim ācakāra svāhā । viṣṇave idaṁ na mama ॥ 5 ॥

त्रिर्देवः पृथिवीम् एष एताम् । विचक्रमे शर्तचसं महित्वा । प्र-विष्णुरस्तु तवसस्तवीयान् । त्वेषगँ् ह्यस्य स्थविरस्य नाम स्वाहा । विष्णवे इदं न मम ॥ ६ ॥

trir devaḥ pṛthivīm eṣa etām । vicakrame śartacasaṁ mahitvā । pra-viṣṇur astu tavasastavīyān । tveṣagm̐ hyasya sthavirasya nāma svāhā । viṣṇave idaṁ na mama ॥ 6 ॥

अतो देवा अवन्तु नो यतो विष्णुर् विचक्रमे। पृथिव्याः सप्त धामभिः स्वाहा। विष्णवे इदं न मम ॥७ ॥

ato devā avantu no yato viṣṇur vicakrame । pṛthivyāḥ sapta dhāmabhiḥ svāhā । viṣṇave idaṁ na mama ॥ 7 ॥

इदं विष्णुर् विचक्रमे त्रेधा निदधे पदम्। समूढम् अस्य पागुँ सुरे स्वाहा। विष्णवे इदं ॥ ८ ॥

idaṁ viṣṇur vicakrame tredha nidadhe padam । samūḍham asya pāgm̐ sure svāhā । viṣṇave idaṁ na mama ॥ 8 ॥

त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन् स्वाहा। विष्णवे इदं न मम ॥ ९ ॥

trīṇi padā vicakrame viṣṇur gopā adābhyaḥ । ato dharmāṇi dhārayan svāhā ॥ viṣṇave idaṁ na mama ॥ 9 ॥

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यस्य सखाः स्वाहा । विष्णवे इदं ॥ १० ॥

viṣṇoḥ karmāṇi paśyata yato vratāni paspaśe । indrasya yujyasya sakhāḥ svāhā । viṣṇave idaṁ na mama ॥ 10 ॥

तद् विष्णोः परमं पदगँ् सदा पश्यन्ति सूरयः। दिवीव चक्षुरातातम् स्वाहा। विष्णवे इदं ॥ ११ ॥

tad viṣṇoḥ paramaṁ padagm̐ sadā paśyanti sūrayaḥ । divīva cakṣurātatam svāhā । viṣṇave idaṁ na mama ॥ 11 ॥

तद्विप्रासो विपन्यवो जागृवागँ् सः समिन्धते। विष्णोर्यत् परमं पदम् स्वाहा। विष्णवे इदं न मम ॥ १२ ॥

tad viprāso vipanyavo jāgṛvāgm̐ saḥ samindhate । viṣṇor yat paramaṁ padam svāhā । viṣṇave idaṁ na mama ॥ 12 ॥

4. VARUNA HOMA (East Kunda)

उ॒द्दु॒त्त॒मं व॑रुण॒ पाश॑म् अ॒स्मद् अवा॑ध॒ं विम॑ध्यम॒गुं श्र॑थाय । अथा॑ व॒यं आ॑दित्य व्र॒ते तवाना॑गसो॒ अदि॑तये स्याम स्वाहा॑ । वरुणाय इदं न मम ॥ १ ॥

ud॑duttamaṁ va॑ruṇa pāśa॑m asmad avā॑ghaṁ vima॑dhyamaguṁ śra॑thāya । atha॑ vayaṁ ā॑ditya vrate tavānā॑gaso aditaye syāma svāhā॑ । varuṇāya idaṁ na mama ॥ 1 ॥

अव॑ते॒ हेडो॑ वरुण॒ अमो॑भि॒र् अव॑ य॒ज्ञोभि॑र् ईमहे ह॒विर्भि॑ः । क्षय॑न्न अ॒स्मभ्य॑म् असुर प्रचेतो॒ राज॒न् नेनागु॑ं सि शिश्रथः कृ॒ता॑नि॑ स्वाहा॑ । वरुणाय इदं न मम ॥ २ ॥

ava॑te heḍo॑ varuṇa amo॑bhir ava॑ yajñobhi॑r īmahe ha॒virbhi॑ḥ । kṣaya॑nna a॒smabhya॑m asura praceto॒ rāja॒n nenāgu॑ṁ si śiśrathaḥ kṛtāni॑ svāhā॑ । varuṇāya idaṁ na mama ॥ 2 ॥

अस्त॑भ्ना॒द्याम् ऋ॑ष॒भो अ॒न्तरि॑क्ष॒म् अमि॑मीत व॒रि॒माण॑ं पृथि॒व्या । असी॑दद् विश्वा॒ भुव॑नानि स॒म्राड् विश्वेत्-ता॒नि॒ वरु॑णस्य व्र॒ता॑नि॑ स्वाहा॑ । वरुणाय इदं न मम ॥ ३ ॥

asta॑bhnādyām ṛ॒ṣabho a॒ntarikṣa॒m ami॑mīta vari॒māṇa॑ṁ pṛthi॒vyā । asī॑dad viśvā॒ bhuva॑nāni sa॒mrāḍ viśvet-tāni॒ varu॑ṇasya vra॒tāni॑ svāhā॑ । varuṇāya idaṁ na mama ॥ 3 ॥

5. VISNU HOMA

South kunda; — 3 ahutis

अतो॑ दे॒वा अ॑वन्तु नो॒ यतो॒ विष्णु॑र्विचक्र॒मे । पृथि॒व्याः स॒प्त धाम॑भिः स्वाहा॑ । विष्णवे इदं न मम ॥

ato॑ de॒vā a॑vantu no॒ yato॒ viṣṇu॑r vicakra॒me । pṛthi॒vyāḥ sa॒pta dhāma॑bhiḥ svāhā॑ । viṣṇave idaṁ na mama ॥

West kunda

विष्णो॒र् नुक॑ं वी॒र्या॑णि प्रवो॑चं॒ यः पार्थि॑वानि विम॒मे रजा॑गु॑ं सि यो अस्क॑भाय॒द् उत्त॑रगु॑ं स॒धस्थ॑ं विचक्रमा॒णस् त्रे॒धो रु॑गा॒यो विष्णो॑ र॒रा॑टमसि॒ विष्णो॑ः पृष्ठम॑सि॒ विष्णो॒ः श्ञप्त्रेस्थो॒ विष्णो॒स्यूर॑सि विष्णो ध्रु॒वम॑सि वैष्ण॒वम॑सि॒ विष्ण॑वे त्वा स्वाहा॑ । विष्णवे इदं न मम ॥

viṣṇo॒r nuka॑ṁ vī॒rya॑ṇi pravo॑caṁ yaḥ pārthi॑vāni vima॒me raja॑gṁ॑ si yo aska॑bhāya॒d uttaragṁ॑ sa॒dhastha॑ṁ vicakramā॒ṇas tre॒dho ru॑gā॒yo viṣṇo॑ ra॒rā॑ṭamasi॒ viṣṇo॑ḥ pṛ॒ṣṭhamasi॒ viṣṇo॑ḥ śña॒ptresthe॒ viṣṇo॒s yūra॑si viṣṇo dhru॒vam a॑si vaiṣṇa॒vam a॑si॒ viṣṇa॑ve tvā svāhā॑ । viṣṇave idaṁ na mama ॥

North kunda

प॒रो मात्र॑या त॒नुवा॑ वृधान । न ते॑ महि॒त्वम् अन्व॑श्नुवन्ति । उ॒भे ते॑ विद्म रज॑सि पृथि॒व्या । विष्णो॑ देव॒त्वम् प॒र॒मस्य॑ विथ्से स्वाहा॑ । विष्णवे इदं न मम ॥

para॒ mātra॑yā ta॒nuvā॑ vṛdhāna । na te॑ mahi॒tvam anva॑śnuvanti । u॒bhe te॑ vidma॒ raja॑si pṛthi॒vyā । viṣṇo॑ deva॒tvam para॒masya॑ vithse svāhā॑ । viṣṇave idaṁ na mama ॥

6. LAKṢMI HOMA (In all four kundas)

हिर॑ण्यवर्णा॑ं हरि॑णीं सुव॒र्ण र॑ज॒त-स्र॑जाम् । च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह स्वाहा॑ । श्रिया इदं न मम ॥ १ ॥

hiraṇ॑yavarṇā॑ṁ hariṇī॑ṁ suva॒rṇa ra॑jata॒-sra॑jām । ca॒ndrāṁ hi॒raṇma॑yī॑ṁ la॒kṣmī॑ṁ jāta॑vedo ma॒ āva॑ha svāhā॑ । śriyā idaṁ na mama ॥ 1 ॥

तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीम् अन॑पगा॒मिनी॑म्। यस्यां॒ हिर॑ण्यं वि॒न्देयं॒ गामश्वं॒ पुरु॑षान् अ॒हम् स्वाहा॑। श्रिया इदं न मम ॥ २ ॥

tāṁ ma॒ āva॑ha॒ jāta॑vedo la॒kṣmīm ana॑pagā॒minī॑m। yasyā॒ṁ hira॑ṇyaṁ vi॒ndeya॒ṁ gāmaśva॒ṁ puru॑ṣān a॒ham svāhā॑। śriyā idaṁ na mama ॥ 2 ॥

अ॒श्वपू॒र्वां र॑थ-म॒ध्यां॒ ह॒स्तिना॑द प्र॒बोधि॑नीम्। श्रीय॑ं दे॒वीम् उप॑ह्वये॒ श्रीर्मा॑ दे॒वी जु॑षताम् स्वाहा॑। श्रिया इदं न मम ॥ ३ ॥

aśva॒pūrvāṁ ra॑tha-ma॒dhyā॒ṁ ha॒stinā॑da pra॒bodhi॑nīm। śrīya॑ṁ de॒vīm upa॑hvaye॒ śrīrmā॑ de॒vī ju॑ṣatām svāhā॑। śriyā idaṁ na mama ॥ 3 ॥

का॒ं सो॑स्मि॒तां हिर॑ण्य प्रा॒कारा॑म् आ॒र्द्रां॒ ज्वल॑न्तीं तृ॒प्तां॒ त॒र्पय॑न्तीम् प॒द्मे॒ स्थि॒तां प॒द्म-व॑र्णा॒ं ताम् इ॒होप॑ह्वये॒ श्रीयम् स्वाहा॑। श्रिया इदं न मम ॥ ४ ॥

kā॒ṁ sosmi॒tāṁ hira॑ṇya prā॒kārā॑m ā॒rdrāṁ jvala॑ntī॒ṁ tṛ॒ptāṁ ta॒rpaya॑ntīm pa॒dme॒ sthi॒tāṁ pa॒dme॒ sthi॒tāṁ pa॒dma-var॑ṇā॒ṁ tām i॒hopa॑hvaye॒ śrīyam svāhā॑। śriyā idaṁ na mama ॥ 4 ॥

च॒न्द्रां प्र॑भा॒सां य॒शसा॒ ज्वल॑न्तीं॒ श्रिय॑ं लो॒के दे॒व जु॑ष्टा॒म् उदा॒राम्। तां प॒द्मिनी॑मीं॒ शर॑ण॒म् अ॒हं प्रप॑द्येऽलक्ष्मीर् मे॑ नश्यता॒ं त्वां वृ॑णे स्वाहा॑। श्रिया इदं न मम ॥ ५ ॥

ca॒ndrāṁ pra॑bhā॒sāṁ ya॒śasā॒ jvala॑ntī॒ṁ śriya॑ṁ lo॒ke de॒va ju॒ṣṭā॒ṁ udā॒rām। tāṁ pa॒dminī॒mī॒ṁ śara॒ṇam a॒haṁ prapa॑dye'lakṣmīr me॑ naśyatā॒ṁ tvāṁ vṛ॒ṇe svāhā॑। śriyā idaṁ na mama ॥ 5 ॥

आ॒दि॒त्य व॑र्णे॒ तप॒सोऽधि॑जा॒तो व॒न॒स्पति॒स् तव॑ वृ॒क्षोऽथ बि॒ल्वः। तस्य॒ फला॑नि॒ तप॒सा नु॑दन्तु मा॒यान्त॑रा॒ याश्च॑ बा॒ह्या अ॑ल॒क्ष्मीः स्वाहा॑। श्रिया इदं न मम ॥ ६ ॥

ā॒di॒tya va॑rṇe॒ tapa॒so'dhi॑jā॒to vana॒spati॒s tava॑ vṛ॒kṣo'tha bi॒lvaḥ। tasya॒ phala॑ni॒ tapa॒sā nudantu māyāntarā॒ yāśca bā॒hyā ala॒kṣmīḥ svāhā॑। śriyā idaṁ na mama ॥ 6 ॥

उपै॑तु मां दे॑व-स॒खः की॒र्तिश्च॒ मणि॑ना स॒ह। प्रा॒दु॒र्भू॒तोऽस्मि॑ राष्ट्रे॒ऽस्मिन् की॒र्तिम् ऋ॒द्धिं द॒दातु मे स्वाहा॑। श्रिया इदं न मम ॥ ७ ॥

upai॑tu māṁ de॑va-sa॒khaḥ kī॒rtiśca॒ maṇi॑nā sa॒ha। prādu॒rbhū॒to'smi॑ rāṣṭre॒'smin kī॒rtim ṛddhiṁ da॒dātu me svāhā॑। śriyā idaṁ na mama ॥ 7 ॥

क्षुत्-पि॑पा॒सां म॑लां॒ ज्ये॒ष्ठाम् अ॑ल॒क्ष्मीं॑ नाशया॒म्यहम्। अभू॑ति॒म् अस॑मृद्धिं॒ च सर्वा॒न् निर्णु॑द मे॒ गृहा॑त् स्वाहा॑। श्रिया इदं न मम ॥ ८ ॥

kṣut-pi॑pāsāṁ ma॑lāṁ jye॒ṣṭhām a॑la॒kṣmīṁ nāśa॑yāmyaham। abhū॒ti॒m asa॑mṛddhi॒ṁ ca sarvā॒n nirṇu॑da me॒ gṛhā॑t svāhā॑। śriyā idaṁ na mama ॥ 8 ॥

ग॒न्ध-द्वा॒रां दु॑रा॒ध॒र्षां॒ नि॒त्य पु॑ष्टां॒ करी॒षिणी॑म्। ई॒श्वरीगु॑ं॒ सर्व॑ भूता॒नां॒ ताम् इ॒होप॑ह्वये॒ श्रियम् स्वाहा॑। श्रिया इदं न मम ॥ ९ ॥

ga॒ndha-dvā॒rāṁ du॑rādha॒rṣā॒ṁ ni॒tya pu॑ṣṭā॒ṁ karī॒ṣi॒ṇी॒m। ī॒śvarīgu॑ṁ॒ sarva॑ bhūtā॒nā॒ṁ tām i॒hopa॑hvaye॒ śriyam svāhā॑। śriyā idaṁ na mama ॥ 9 ॥

मन॑सः॒ काम॒म् आकू॑तिं वा॒चस् स॒त्यम् अ॑शीमहि। प॒शू॒नागु॑ं रू॒पम्-अ॑न्नस्य॒ मयि॒ श्रीः श्र॑यता॒ं यशः॑ स्वाहा॑। श्रिया इदं न मम ॥ १० ॥

mana॑saḥ kāma॒m ākū॑ti॒ṁ vā॒cas sa॒tyam a॑śīmahi। pa॒śū॒nāgu॑ṁ rū॒pam-a॑nnasya॒ mayi॒ śrīḥ śra॑yatā॒ṁ ya॑śaḥ svāhā॑। śriyā idaṁ na mama ॥ 10 ॥

क॒र्द॑मे॑न प्र॑जाभू॒ता म॒यि॒ संभ॑व क॒र्द॑म। श्रिय॑ं वा॒स॑य॑ मे कु॒ले मा॒तर॑ं॒ पद्म॑ मालि॑नीम् स्वाहा॑। श्रिया इदं न मम ॥ ११ ॥

kardamena prajābhūtā mayi sambhava kardama । śriyam vāsaya me kule mātaram padma mālinīm svāhā । śriyā idam na mama ॥ 11 ॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे । निच देवीं मातरग्गश् श्रियं वासय मे कुले स्वाहा । श्रिया इदं न मम ॥ १२ ॥

āpaḥ sṛjantu snigdhāni ciklīta vasa me gṛhe । nica devīm mātaraggaś śriyam vāsaya me kule svāhā । śriyā idam na mama ॥ 12 ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेम मालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह स्वाहा । श्रिया इदं न मम ॥ १३ ॥

ārdrām puṣkariṇīm puṣṭim suvarṇām hema mālinīm । sūryām hiraṇmayīm lakṣmīm jātavedo ma āvaha svāhā । śriyā idam na mama ॥ 13 ॥

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्म मालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह स्वाहा । श्रिया इदं न मम ॥ १४ ॥

ārdrām yaḥ kariṇīm yaṣṭim piṅgalām padma mālinīm । candrām hiraṇmayīm lakṣmīm jātavedo ma āvaha svāhā । śriyā idam na mama ॥ 14 ॥

तां म आवह जातवेदो लक्ष्मीम् अनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषान् अहम् स्वाहा । श्रिया इदं न मम ॥ १५ ॥

tām ma āvaha jātavedo lakṣmīm anapagāminīm । yasyām hiraṇyam prabhūtam gāvo dāsyo'śvān vindeyam puruṣān aham svāhā । śriyā idam na mama ॥ 15 ॥

7. BHU DEVI HOMA

भूमिर् भूम्ना द्यौर् वरिणाऽन्तरिक्षं महित्वा । उपस्थे ते देव्यदितेऽग्निम् अन्नादम् अन्नाद्याया दधे स्वाहा । भूम्या इदं ॥ १ ॥

bhūmir bhūmnā dyaur variṇā'ntarikṣam mahitvā । upasthe te devyadite'gnim annādam annādyāyā dadhe svāhā । bhūmyā idam ॥ 1 ॥

आयङ्गौः पृश्निरक्रमी दसनन् मातरं पुनः । पितरं च प्रयन्त्-सुवः स्वाहा । भूम्या इदं न मम ॥ २ ॥

āyaṅgauḥ pṛśnir akramī dasanan mātaram punaḥ । pitaram ca prayant-suvaḥ svāhā । bhūmyā idam na mama ॥ 2 ॥

त्रिगुं शद्धाम विराजति वाक् पतङ्गाय शिश्रये । प्रत्यस्य वह द्यभिः स्वाहा । भूम्या इदं न मम ॥ ३ ॥

triguṁ śaddhāma virājati vāk pataṅgāya śiśraye । pratyasya vaha dyabhiḥ svāhā । bhūmyā idam na mama ॥ 3 ॥

अस्य प्राणाद् अपानत्यन्तश्चरति रोचना । व्यख्यन् महिषः सुवः स्वाहा । भूम्या इदं न मम ॥ ४ ॥

asya prāṇād apānatyantaścarati rocanā । vyakhyan mahiṣas suvaḥ svāhā । bhūmyā idam na mama ॥ 4 ॥

यत्वा क्रुद्धाः परोवप मन्युना यद् अवर्त्या । सुकल्पम् अग्ने तत् तव पुनस्-त्वोद्दीपयाम् असि स्वाहा । भूम्या इदं न मम ॥ ५ ॥

yatvā kruddhāḥ parovapa manyunā yad avartyā । sukalpam agne tat tava punas-tvoddīpayām asi svāhā । bhūmyā idam na mama ॥ 5 ॥

यत्ते मन्यु परोप्तस्य पृथिवीम् अनुदध्वसे । आदित्या विश्वे तद्-देवा वसवश्च समाभरन् स्वाहा । भूम्या इदं न मम ॥ ६ ॥

yatte manyu paroptasya pṛthivīm anudadhvase । ādityā viśve tad-devā vasavaśca samābharan svāhā । bhūmyā idaṁ na mama ॥ 6 ॥

मनो ज्योतिर् जुषताम् आज्यं विच्छिन्नं यज्ञगुं समिमं दधातु । बृहस्पतिस् तनुताम् इमं नो विश्वे देवा इह मादयन्ताम् स्वाहा । भूम्या इदं न मम ॥ ७ ॥

mano jyotir juṣatām ājyaṁ vicchinnaṁ yajñaguṁ samimaṁ dadhātu । bṛhaspatis tanutām imaṁ no viśve devā iha mādayantām svāhā । bhūmyā idaṁ na mama ॥ 7 ॥

मेदिनी देवी वसुन्धरा स्याद् वसुधा देवी वासवी । ब्रह्म वर्चसः पितृणागुं श्रोत्रं चक्षुर् मनः स्वाहा । भूम्या इदं न मम ॥ ८ ॥

medinī devī vasundharā syād vasudhā devī vāsavī । brahma varcasaḥ pitṛṇāguṁ śrotraṁ cakṣur manaḥ svāhā । bhūmyā idaṁ na mama ॥ 8 ॥

देवी हिरण्य-गर्भिणी देवी प्रसूवरी । सदने सत्यायने सीद स्वाहा । भूम्या इदं न मम ॥ ९ ॥

devī hiraṇya-garbhiṇī devī prasūvarī । sadane satyāyane sīda svāhā । bhūmyā idaṁ na mama ॥ 9 ॥

समुद्रवती सावित्रीह नो देवी मह्यङ्गी । मही-धरणी महोव्यथिष्ठ स्वाहा । भूम्या इदं न मम ॥ १० ॥

samudravatī sāvitrīha no devī mahyaṅgī । mahī-dharaṇī mahovyathiṣṭha svāhā । bhūmyā idaṁ na mama ॥ 10 ॥

शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषणी । इन्द्र पत्नी व्यापिनी सुरसरिद् इह स्वाहा । भूम्या इदं न मम ॥ ११ ॥

śṛṅge śṛṅge yajñe yajñe vibhīṣaṇī । indra patnī vyāpinī surasarid iha svāhā । bhūmyā idaṁ na mama ॥ 11 ॥

वायुमती जलशयनी श्रियं धाराजा सत्यन्धोपरि मेदिनी । श्वोपरिधतं परिगाय स्वाहा । भूम्या इदं 0 ॥१२ ॥

vāyumatī jalaśayanī śriyaṁ dhārājā satyandhopari medinī । śvoparidhataṁ parigāya svāhā । bhūmyā idaṁ na mama ॥ 12 ॥

विष्णु-पत्नीं महीं देवीं माधवीं माधव-प्रियाम् । लक्ष्मीं प्रिय सखीं देवीं नमाम्यच्युत वल्लभाम् स्वाहा । भूम्या इदं न मम ॥१३ ॥

viṣṇu-patnīṁ mahīṁ devīṁ mādhavīṁ mādhava-priyām । lakṣmīṁ priya sakhīṁ devīṁ namāmyacyuta vallabhām svāhā । bhūmyā idaṁ ॥ 13 ॥

ॐ धनुर्धरायै विद्महे सर्व सिद्ध्यै च धीमहि । तन्नो धरा प्रचोदयात् स्वाहा । भूम्या इदं न मम ॥ १४ ॥

oṁ dhanur-dharāyai vidmahe sarva siddhyai ca dhīmahi । tanno dharā pracodayāt svāhā । bhūmyā idaṁ na mama ॥ 14 ॥

8. VEDA HOMA

East — Rik veda (x 108)

अग्निमीले पुरोहितं यज्ञस्य देवम् ऋत्विजं । होतारं रत्न धातमग्ग्स् स्वाहा । ऋग्वेदाय इदं न मम ॥ १ ॥

agnim īḷe purohitaṁ yajñasya devam ṛtvijaṁ । hotāraṁ ratna dhātamaggs svāhā । ṛgvedāya idaṁ na mama ॥ 1 ॥

South — Yajur Veda (x 108)

इषे त्वोर्जे त्वा वायवः स्थोपायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे स्वाहा । यजुर्वेदाय इदं न मम ॥ २ ॥

iṣe tvorje tvā vāyavas sthopāyavas stha devo vas savitā prārpayatu śreṣṭhatamāya karmaṇe svāhā । yajurvedāya idaṁ na mama ॥ 2 ॥

West — Sāma Veda (x 108)

अग्न आयाहि वीतये गृणानो हव्य दातये । निहोता सत्सि बर्हिषि स्वाहा । साम वेदाय इदं न मम ॥ ३ ॥

agna āyāhi vītaye gṛṇāno havya dātaye । nihotā satsi barhiṣi svāhā । sāma vedāya idaṁ na mama ॥ 3 ॥

North — Atharvana Veda (x 108)

शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः स्वाहा । अथर्वन वेदाय इदं न मम ॥ ४ ॥

śan-no devīr-abhiṣṭaya āpo bhavantu pītaye । śaṁ yor-abhisravantu nas svāhā । atharvana vedāya idaṁ na mama ॥ 4 ॥

9. HIRAṆYAGARBHA, INDRA, NĀRĀYAṆA & BRAHMĀ HOMAS

East (ājyam) — हिरण्य-गर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम स्वाहा ॥ हिरण्यगर्भाय इदम् न मम ॥

hiraṇya-garbhaḥ samavartatāgre bhūtasya jātaḥ patireka āsīt । sa dādhāra pṛthivīṁ dyāmutemāṁ kasmai devāya haviṣā vidhema svāhā ॥ hiraṇyagarbhāya idaṁ na mama ॥

South (tila) — आभिर्-गीर्भिर्-यदतो न ऊनम् । आप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि । भूयिष्ठभाजो अध ते स्याम स्वाहा ॥ इन्द्राय हरिवत इदं न मम ॥

ābhir-gīrbhir-yadato na ūnam । āpyāyaya harivo vardhamānaḥ । yadā stoṭṛbhyo mahi gotrā rujāsi । bhūyiṣṭhabhājo adha te syāma svāhā ॥ indrāya harivata idaṁ ॥

West (paddy) — नारायणं महा-ज्ञेयं विश्वात्मानं परायणम् ॥ नारायण परंब्रह्म तत्त्वं नारायणः परः ॥ नारायण परो ज्योतिरात्मा नारायणः परः स्वाहा ॥ नारायणायेदं न मम ॥

nārāyaṇaṁ mahā-jñeyaṁ viśvātmānaṁ parāyaṇam ॥ nārāyaṇa paraṁ-brahma tattvaṁ nārāyaṇaḥ paraḥ ॥ nārāyaṇa paro jyotir-ātmā nārāyaṇaḥ paraḥ svāhā ॥ nārāyaṇāyedaṁ na mama ॥

North (samit) — उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्-त्वे-महे । उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर् भवा सचा स्वाहा ॥ ब्रह्मणस्पतयेदं न मम ॥

uttiṣṭha brahmaṇaspate devayantas-tve-mahe । upa prayantu marutaḥ sudānava indra prāśūr bhavā sacā svāhā ॥ brahmaṇaspatayedam ॥

10. AṢṬHĀKṢARI & DVĀDAŚĀKṢARI HOMAM (Western Kunda)

ॐ नमो नरयणाय स्वाहा (१०८) oṁ namo narayaṇāya svāhā (108)

ॐ नमो भगवते वासुदेवाय स्वाहा (१०८) oṁ namo bhagavate vāsudevāya svāhā (108)

11. CATUR-VIMŚATI MŪRTI HOMAM (In all four kundas)

ॐ वासुदेवाय स्वाहा । ॐ संकर्षणाय ० । ॐ प्रद्युम्नाय ० । ॐ अनिरुद्धाय ० । ॐ केशवाय ० । ॐ नारायणाय ० । ॐ माध्वाय ० । ॐ गोविन्दाय ० । ॐ विष्णवे ० । ॐ मधुसूदनाय ० । ॐ त्रिविक्रमाय ० । ॐ वामनाय ० । ॐ श्रीधराय ० । ॐ हृषीकेशाय ० । ॐ पद्मनाभाय ० । ॐ दामोदराय ० । ॐ मत्स्याय ० । ॐ कूर्माय ० । ॐ वराहाय ० । ॐ नारसिंहाय ० । ॐ वामनाय ० । ॐ भार्गव-रामाय ० । ॐ श्री-रामाय ० । ॐ बल-रामाय ० । ॐ श्री-कृष्णाय ० । ॐ कल्किने ० । ॐ श्रीयै ० । ॐ महालक्ष्म्यै ० ॥

oṁ vāsudevāya svāhā । oṁ saṁkarṣaṇāya 0 । oṁ pradyumnāya 0 । oṁ aniruddhāya 0 । oṁ keśavāya 0 । oṁ nārāyaṇāya 0 । oṁ mādhvāya 0 । oṁ govindāya 0 । oṁ viṣṇave 0 । oṁ madhusūdanāya 0 ।

oṁ trivikramāya 0 | oṁ vāmanāya 0 | oṁ śrīdharāya 0 | oṁ hṛṣīkeśāya 0 | oṁ padmanābhāya 0 | oṁ dāmodarāya 0 | oṁ matsyāya 0 | oṁ kūrmāya 0 | oṁ varāhāya 0 | oṁ nārasiṁhāya 0 | oṁ vāmanāya 0 | oṁ bhārgava-rāmāya 0 | oṁ śrī-rāmāya 0 | oṁ bala-rāmāya 0 | oṁ śrī-kṛṣṇāya 0 | oṁ kalkine 0 | oṁ śrīyai 0 | oṁ mahālakṣmyai 0 ||

12. VIṢṆU SAHASRANĀMA HOMAM (in all four kundas).

❖ *Depending on time this can also be done using the ślokas rather than the individual names.*

ॐ विश्वस्मै स्वाहा । विष्णवे । वषट्-काराय । भूत-भव्य भवत्-प्रभवे । भूत-क्रते । भूत-भ्रते । भावाय । भूतात्मने । भूत-भावनाय ॥ १ ॥ पूतात्मने । परमात्मने । मुक्तानाम् परमा-गतये । अव्ययाय । पुरुषाय । सक्षिणे । क्षेत्रज्ञाय । अक्षराय ॥ २ ॥ योगाय । योग-विदां-नेत्रे । प्रधान पुरुषेश्वराय । नारसिंह वपुषे । श्रीमते । केशवाय । पुरुषोत्तमाय ॥ ३ ॥ सर्वस्मै । शर्वाय । शिवाय । स्थानवे । भूतादये । निधये अव्ययाय । शम्भवाय । भावनाय । भर्त्रे । प्रभवाय । प्रभवे । इश्वराय ॥ ४ ॥ स्वायंभुवे । शंभवे । आदित्याय । पुष्कराक्षाय । मह-स्वनाय । अनादि-निधनाय । धात्रे । विधात्रे । धातुर्-उत्तमाय ॥ ५ ॥ अप्रमेयाय । ह्रषीकेसाय । पद्मनाभाय । अमर-प्रभवे । विश्वकर्मने । मनवे । त्वष्ट्रे । स्थविष्ठाय । स्थविराय । ध्रुवाय ॥ ६ ॥ अग्राह्याय । शाश्वताय । कृष्णाय । लोहिताक्षाय । प्रतर्दनाय । प्रभूताय । त्रिककुब्-धाम्ने । पवित्राय । मङ्गलाय -परस्मै ॥ ७ ॥ ईशानाय । प्रणादाय । प्राणाय । ज्येष्ठाय । श्रेष्ठाय । प्रजापतये । हिरण्य-गर्भाय । भू-गर्भाय । माधवाय । मधु-सूदनाय ॥ ८ ॥ इश्वराय । विक्रमिने । धन्विने । मेधाविने । विक्रमाय । क्रमाय । अनुत्तमाय । दुरधर्साय । कृतज्ञाय । कृते । आमवते ॥ ९ ॥ सुरेशाय । शरणाय । शमणे । विश्व-रेतसे । प्रजा-भवाय । अह्ने । संवत्सराय । व्यालाय । प्रत्ययाय । सर्व-दर्शनाय ॥ १० ॥

oṁ viśvasmai svāhā | viṣṇave | vaṣaṭ-kārāya | bhūta-bhavya bhavat-prabhave | bhūta-krte | bhūta-bhrte | bhāvāya | bhūtātmane | bhūta-bhāvanāya || 1 || pūtātmane | paramātmane | muktānām paramā-gataye | avyayāya | puruṣāya | sakṣiṇe | kṣetrajñāya | akṣarāya || 2 || yogāya | yoga-vidāṁ-netre | pradhāna puruṣeśvarāya | nārasiṁha vapuṣe | śrīmate | keśavāya | puruṣottamāya || 3 || sarvasmai | śarvāya | śivāya | sthānave | bhūtādaye | nidhaye avyayāya | śambhavāya | bhāvanāya | bhartre | prabhavāya | prabhave | iśvarāya || 4 || svāyaṁbhuve | śaṁbhave | ādityāya | puṣkarākṣāya | maha-svanāya | anādi-nidhanāya | dhātre | vidhātre | dhātur-uttamāya || 5 || aprameyāya | hṛṣīkesāya | padmanābhāya | amara-prabhave | viśvakarmane | manave | tvaṣṭre | sthaviṣṭhāya | sthavirāya | dhruvāya || 6 || agrāhyāya | śāśvatāya | kṛṣṇāya | lohitākṣāya | pratardanāya | prabhūtāya | trikakub-dhāmne | pavitrāya | maṅgalāya -parasmai || 7 || īśānāya | praṇādāya | prāṇāya | jyeṣṭhāya | śreṣṭhāya | prajāpataye | hiraṇya-garbhāya | bhū-garbhāya | mādhavāya | madhu-sūdanāya || 8 || iśvarāya | vikramine | dhanvine | medhāvine | vikramāya | kramāya | anuttamāya | duradharsāya | kṛtajñāya | kṛte | āmavate || 9 || sureśāya | śaraṇāya | śamaṇe | viśva-retase | prajā-bhavāya | ahne | saṁvatsarāya | vyālāya | pratyayāya | sarva-darśanāya || 10 ||

अजाय । सर्वेश्वराय । सिद्धाय । सिद्धये । सर्वादये अच्युताय । वृष-कपये । अमेयात्मने । सर्व-योग-विनिः-सृताय ॥ ११ ॥ वसवे । वसु-मनसे । सत्याय । समात्मने । सम्मिताय । समाय । अमोघाय । पुण्डरीकाक्षाय । वृस-कर्मने । वृषाक्रतये ॥ १२ ॥ रुद्राय । बहु-शिरसे । बभ्रवे । विश्व-योनये । शुचि-श्रवसे । अमृताय । शाश्वताय स्थनवे । वरारोहाय । महा-तपसे ॥ १३ ॥ सर्व-गाय । सर्व-विदे । भानवे । विश्वक्षेनाय । जनार्दनाय । वेदाय । वेद-विदे । अव्यङ्गाय । वेदाङ्गाय । वेद-विदे । कवये ॥ १४ ॥ लोकध्यक्षाय । सुरध्यक्षाय । धर्माध्यक्षाय । क्रतक्रताय । चतुरात्मने । चतुर्-व्यूहाय । चतुर्-दंष्ट्राय । चतुर्-भुजाय ॥ १५ ॥ भ्राजिष्णवे । भोजनाय । भोक्त्रे । सहिष्णवे । जगद्-आदिजाय । अनघाय । विजयाय । जेत्रे । विश्व-योनये । पुनर्-वसवे ॥ १६ ॥ उपेन्द्राय । वामनाय । प्रांशवे । अमोघाय । सुचये । ऊइर्जिताय । अतिन्द्राय । सङ्ग्रहाय । सर्गाय । धृतात्मने । नियमाय । यमाय ॥ १७ ॥ वेद्याय । वैद्याय । सदा-योगिने । वीरघ्ने । माधवाय । मधवे । अतिन्द्रियाय । महामायाय । महोत्साहाय । महा-बलाय ॥ १८ ॥

महा-बुद्धये । महावीर्याय । महाशक्तये । महाद्युतये । अनिर्देश्यवपुशे । श्रीमते । अमेयात्मने । महाद्रिधृषे ॥ १९ ॥
महेस्वासाय । महीभर्त्रे । श्रीनिवासाय । सताङ्-गतये । अनिरुद्धाय । सुरानन्दाय । गोविन्दाय । गोविदां-पतये ॥ २०

ajāya | sarveśvarāya | siddhāya | siddhaye | sarvādaye | acyutāya | vṛṣa-kapaye | ameyātmane | sarva-yoga-viniḥ-sṛtāya ॥ 11 ॥ vasave | vasu-manase | satyāya | samātmane | sammitāya | samāya | amoghāya | puṇḍarīkākṣāya | vṛsa-karmane | vṛṣākrtaye ॥ 12 ॥ rudrāya | bahu-śirase | babhrave | viśva-yonaye | śuci-śravase | amṛtāya | śāśvatāya sthanave | varārohāya | mahā-tapase ॥ 13 ॥ sarva-gāya | sarva-vide | bhānave | viśvakṣenāya | janārdanāya | vedāya | veda-vide | avyaṅgāya | vedāṅgāya | veda-vide | kavaye ॥ 14 ॥ lokadhyakṣāya | suradhyakṣāya | dharmādhyakṣāya | krtakrtāya | caturātmane | catur-vyūhāya | catur-daṁṣṭrāya | catur-bhujāya ॥ 15 ॥ bhrājiṣṇave | bhojanāya | bhoktre | sahiṣṇave | jagad-ādijāya | anaghāya | vijayāya | jetre | viśva-yonaye | punar-vasave ॥ 16 ॥ upendrāya | vāmanāya | prāṁśave | amoghāya | sucaye | ūirjitāya | atindrāya | saṅgrahāya | sargāya | dhṛtātmane | niyamāya | yamāya ॥ 17 ॥ vedyāya | vaidyāya | sadā-yogine | vīraghne | mādhavāya | madhave | atindriyāya | mahāmāyāya | mahotsāhāya | mahā-balāya ॥ 18 ॥ mahā-buddhaye | mahā-viryāya | mahā-śaktaye | mahā-dyutaye | anirdeśya-vapuśe | śrīmate | ameyātmane | mahādridhṛṣe ॥ 19 ॥ mahesvāsāya | mahī-bhartre | śrīnivāsāya | satāṅ-gataye | aniruddhāya | surānandāya | govindāya | govidāṁ-pataye ॥ 20 ॥

मरिचये । दमनाय । हंसाय । सुपमाय । भुजगोत्तमाय । हिरण्य-नभाय । सुतपसे । पद्म-नाभाय । प्रजापतये ॥ २१ ॥
अमृत्यवे । सर्व-दृषे । सिंहाय । सन्धात्रे । सन्धिमते । स्थिराय । अजाय । दुर्मर्षनाय । शस्त्रे । विश्रुतात्मने । सुरारिघ्ने ॥ २२ ॥ गुरुर्-गुरु-तमाय । धाम्ने । सत्याय । सत्य-पराक्रमाय । निमिशाय । अनिमिषाय । स्त्रग्विने । वाचस्पतये । उदाराधिये ॥ २३ ॥ अग्रण्ये । ग्रामन्ये । श्रीमते । न्यायाय । नेत्रे । समीरनाय । सहस्र-मूर्ध्ने । विश्वात्मने । सहस्राक्षाय । सहस्र-पदे ॥ २४ ॥ आवर्तनाय । निवृत्तात्मने । सम्वृताय । सम्प्रमर्दनाय । अहस्-सम्वर्तकाय । वह्नये । अनिलाय । धरणी-धराय ॥ २५ ॥ सुप्रसदाय । प्रसन्न्-आत्मने । विश्व-स्रष्ट्रे । विश्व-भुग्-विभवे । सत्-कर्त्रे । सत्-क्रत्ताय । साधवे । जह्नवे । नरायनाय । नराय ॥ २६ ॥ असङ्ख्येयाय । अप्रमेय्-आत्मने । विशिष्ठाय । शिष्ठ-क्रिते । शुचये । सिद्धर्थाय । सिद्ध-सङ्कल्पाय । सिद्धि-दाय । सिद्धि-साधनाय ॥ २७ ॥ वृषाहिणे । वृषभाय । विष्णवे । वृष-पर्वणे । वृषोदराय । वर्धनाय । वर्ध-मानाय । विविक्ताय । श्रुति-सागराय ॥ २८ ॥ सुभुजाय । दुर्धराय । वाग्मिने । महेन्द्राय । वसुदाय । वसवे । नैक-रूपाय । बृहद्-रूपाय । शिपिविष्टाय । प्रकाशनाय ॥ २९ ॥ ओजस्-तेजो-द्युति-धराय । प्रकाशात्मने । प्रतापनाय । ऋद्धाय । स्पष्टाक्षराय । मन्त्राय । चन्द्रांशवे । भास्कर-द्युतये ॥ ३० ॥

maricaye | damanāya | haṁsāya | supamāya | bhujagottamāya | hiraṇya-nabhāya | sutapase | padma-nābhāya | prajāpataye ॥ 21 ॥ amṛtyave | sarva-dṛṣe | siṁhāya | sandhātre | sandhimate | sthirāya | ajāya | durmarṣanāya | śastre | viśrutātmane | surārighne ॥ 22 ॥ gurur-guru-tamāya | dhāmne | satyāya | satya-parākramāya | nimiśāya | animiṣāya | sragvine | vācaspataye | udārādhiye ॥ 23 ॥ agraṇye | grāmanye | śrīmate | nyāyāya | netre | samīranāya | sahasra-mūrdhne | viśvātmane | sahasrākṣāya | sahasra-pade ॥ 24 ॥ āvartanāya | nivṛttātmane | samvṛtāya | sampramardanāya | ahaḥ samvartakāya | vahnaye | anilāya | dharaṇī-dharāya ॥ 25 ॥ suprasadāya | prasann-ātmane | viśva-srṣṭre | viśva-bhug-vibhave | sat-kartre | sat-krtāya | sādhave | jahnave | narāyanāya | narāya ॥ 26 ॥ asaṅkhyeyāya | apramey-ātmane | viśiṣṭhāya | śiṣṭha-krite | śucaye | siddharthāya | siddha-saṅkalpāya | siddhi-dāya | siddhi-sādhanāya ॥ 27 ॥ vṛṣāhiṇe | vṛṣabhāya | viṣṇave | vṛṣa-parvaṇe | vṛṣodarāya | vardhanāya | vardha-mānāya | viviktāya | śruti-sāgarāya ॥ 28 ॥ subhujāya | durdharāya | vāgmine | mahendrāya | vasudāya | vasave | naika-rūpāya | bṛhad-rūpāya | śipiviṣṭāya | prakāśanāya ॥ 29 ॥ ojas-tejo-dyuti-dharāya | prakāśātmane | pratāpanāya | ṛddhāya | spaṣṭākṣarāya | mantrāya | candrāṁśave | bhāskara-dyutaye ॥ 30 ॥

अमृतांशूद्भवाय । भानवे । शशिबिन्दवे । सुरेश्वराय । औसधाय । जगतस्-सेतवे । सत्य-धर्म-पराक्रमाय ॥ ३१ ॥ भूत-भव्य-भवन्-नथाय । पवनाय । पावनाय । अनलाय । कामघ्ने । काम-क्रते । कान्ताय । कामाय । काम-प्रदाय । प्रभवे ॥ ३२ ॥ युगादि-कृते । युगावर्ताय । नैक-मयाय । महाशनाय । अदृश्याय । व्यक्त-रूपाय । सहस्र-जिते । अनन्त-जिते ॥ ३३ ॥ इष्टाय । अविशिस्ताय । शिष्टेष्टाय । शिखन्दिने । नहुषाय । वृषाय । क्रोधघ्ने । क्रोध-कृते । कर्त्रे । विश्व-बाहवे । मही-धराय ॥ ३४ ॥ अच्युताय । प्रथिताय । प्रानाय । प्राणदाय । वासवानुजाय । अपाम्-निधये । अधिष्ठनाय । अप्रमत्ताय । प्रतिष्ठिताय ॥ ३५ ॥ स्कन्दाय । स्कन्द-धराय । धुर्याय । वरदाय । वायु-वाहनाय । वासुदेवाय । बृहद्-भानवे आदिदेवाय । पुरन्दराय ॥ ३६ ॥ अशोकाय । तारणाय । ताराय । शूराय । सौरये । जनेश्वराय । अनुकूलाय । शतावर्ताय । पद्मिने । पद्म-निभेक्षनाय ॥ ३७ ॥ पद्म-नाभाय । अरविन्दाक्षाय । पद्म-गर्भाय । शरीर-भृते । महाऋद्धये । ऋद्धाय । वृद्धात्मने । महाक्षाय । गरुड-ध्वजाय ॥ ३८ ॥ अतुलाय । सरभाय । भीमाय । सम-यज्ञाय । हविर्-हरये । सर्व-लक्षन-लक्षन्याय । लक्ष्मीवते । समितिञ्जायय ॥ ३९ ॥ विक्षराय । रोहिताय । मर्गाय । हेतवे । दामोदराय । सहाय । मही-धराय । महा-भागाय । वेगवते । अमिताशनाय ॥ ४० ॥

Amṛtāṁśūdbhavāya | bhānave | śaśibindave | sureśvarāya | ausadhāya | jagataḥ setave | satya-dharma-parākramāya ॥ 31 ॥ bhūta-bhavya-bhavan-nathāya | pavanāya | pāvanāya | analāya | kāmaghne | kāma-krte | kāntāya | kāmāya | kāma-pradāya | prabhave ॥ 32 ॥ yugādi-kṛte | yugāvartāya | naika-mayāya | mahāśanāya | adṛśyāya | vyakta-rūpāya | sahasra-jite | ananta-jite ॥ 33 ॥ iṣṭāya | aviśistāya | śiṣṭeṣṭāya | śikhandine | nahuṣāya | vṛṣāya | krodhaghne | krodha-kṛte | kartre | viśva-bāhave | mahī-dharāya ॥ 34 ॥ acyutāya | prathitāya | prānāya | prāṇadāya | vāsavānujāya | apām-nidhaye | adhiṣṭhanāya | apramattāya | pratiṣṭhitāya ॥ 35 ॥ skandāya | skanda-dharāya | dhuryāya | varadāya | vāyu-vāhanāya | vāsudevāya | bṛhad-bhānave ādidevāya | purandarāya ॥ 36 ॥ aśokāya | tāraṇāya | tārāya | śūrāya | sauraye | janeśvarāya | anukūlāya | śatāvartāya | padmine | padma-nibhekṣanāya ॥ 37 ॥ padma-nābhāya | aravindākṣāya | padma-garbhāya | śarīra-bhṛte | mahāṛddhaye | ṛddhāya | vṛddhātmane | mahākṣāya | garuḍa-dhvajāya ॥ 38 ॥ atulāya | sarabhāya | bhīmāya | sama-yajñāya | havir-haraye | sarva-lakṣana-lakṣanyāya | lakṣmīvate | samitiñjāyaya ॥ 39 ॥ vikṣarāya | rohitāya | margāya | hetave | dāmodarāya | sahāya | mahī-dharāya | mahā-bhāgāya | vegavate | amitāśanāya ॥ 40 ॥

उद्भवाय । क्षोभनाय । देवाय । श्री-गर्भाय । परमेश्वराय । करणाय । कारणाय । कर्त्रे । विकर्त्रे । गहनाय । गुहाय ॥ ४१ ॥ व्यवसायाय । व्यवष्ठानाय । संस्थानाय । स्थानदाय । ध्रुवाय । परर्द्धये । परम-स्पष्ताय । तुष्टाय । पुष्ठाय । शुभेक्षनाय ॥ ४२ ॥ रामाय । विरामाय । विरतो-मार्गाय । नेयाय । नयाय । अनयाय । विराय । शक्तिमतां-श्रेष्ठाय । धर्माय । धर्म-विद्-उत्तमाय ॥ ४३ ॥ वैकुण्ठाय । पुरुषाय । प्राणाय । प्राणदाय । प्रणमाय । पृथवे । हिरण्य-गर्भाय । शत्रुघ्नाय । व्याप्ताय । वायवे । अधोक्षजाय ॥ ४४ ॥ ऋतवे । सुदर्शनाय । कलाय । परमेष्ठिने । परिग्रहाय । उग्राय । संवत्सराय । दक्षाय । विश्रामाय । विश्व-दक्षिनाय ॥ ४५ ॥ विस्ताराय । स्थावर-स्थानवे । प्रमानाय । बिजायाव्ययाय । अर्थाय । अनर्थाय । महाकोशाय । महाभागाय । महाधनाय ॥ ४६ ॥ अनिर्विन्नाय । स्थविष्ठाय । भुवे । धर्म-यूपाय । महा-मखाय । नक्षत्र-नेमये । नक्षत्रिणे । क्षमाय । क्षामाय । समीहनाय ॥ ४७ ॥ यज्ञाय । इज्याय । महेज्याय । क्रतवे । सत्राय । सताङ्-गतये । सर्व-दर्शिने । विमुक्तात्मने । सर्वज्ञाय । ज्ञानम्-उत्तमाय ॥ ४८ ॥ सुव्रताय । सुमुखाय । सूक्ष्माय । सुघोषाय । सुखदाय । सुहृदे । मनो-हराय । जित-क्रोधाय । वीर-बाहवे । विदारनाय ॥ ४॥ स्वापनाय । स्ववशाय । व्यापिने । नैकात्मने । नैक-कर्म-कृते । वत्सराय । वत्सलाय । वत्सिने । रत्न-गर्भाय । धनेश्वराय ॥ ५० ॥

udbhavāya | kṣobhanāya | devāya | śrī-garbhāya | parameśvarāya | karaṇāya | kāraṇāya | kartre | vikartre | gahanāya | guhāya ॥ 41 ॥ vyavasāyāya | vyavaṣṭhānāya | saṁsthānāya | sthānadāya | dhruvāya | pararddhaye | parama-spaṣtāya | tuṣṭāya | puṣṭhāya | śubhekṣanāya ॥ 42 ॥ rāmāya | virāmāya | virato-mārgāya | neyāya | nayāya | anayāya | virāya | śaktimatāṁ-śreṣṭhāya | dharmāya |

45. The Supreme Ruler , the Overlord, the Controller is the Celestial Harmony; his manifest potential is the whole universe called the worlds. May he protect .....

ताभ्यः स्वाहा। विश्वस्मा अप्सरोभ्य इदं ॥४६॥
tābhyaḥ svāhā। viśvasmā apsarobhya idaṁ॥ 46॥

सुक्षितिः सुभूतिर् भद्रकृत् सुवर्वान् पर्जन्यो गंधर्वस्तस्य विद्युतोऽप्सरसो रुचो नाम ----- स्वाहा । पर्जन्याय गंधर्वायेदं ॥४७॥
sukṣitiḥ subhūtir bhadrakṛt suvarvān parjanyo gandharvas tasya vidyuto-'psaraso ruco nāma..... svāhā। parjanyāya gandharvāyedam॥ 47॥

47. With fair abode, fair wealth, doer of good deeds, holding the light, Parjanya is the Celestial Harmony, his manifest potential is the lightening (called) the radiant.

ताभ्यः स्वाहा। विद्युद्भ्योऽप्सरोभ्य इदं ॥ ४८ ॥
tābhyaḥ svāhā। vidyudbhyo'psarobhya idaṁ॥ 48॥

दूरेहेतिरमृडयो मृत्युर्गंधर्वस्तस्य प्रजा अप्सरसो भीरुवो नाम ----- स्वाहा । मृत्यवे गंधर्वायेदं ॥४९॥
dūrehetir amruḍayo mṛtyur gandharvas tasya prajā apsaraso bhīruvo nāma ..... svāhā। mṛtyave gandharvāyedam॥ 49॥

49. He Whose dart speeds afar, the Pitiless, Death is the Celestial Harmony; his manifest potential are the creatures, (called) the Fearfull. May he protect this .....

ताभ्यः स्वाहा । प्रजाभ्योऽप्सरोभ्य इदं ॥५०॥
tābhyaḥ svāhā। prajābhyo'psarobhya idaṁ॥ 50॥

चारुः कृपणकाशी कामो गंधर्व तस्याधयोऽप्सरसः शोचयंतीर्नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा। कामाय गंधर्वायेदं ॥ ५१ ॥
cāruḥ krpaṇakāśī kāmo gandharva tasyādhayo'psarasaś śocayantīr-nāma sa idaṁ brahma kṣatraṁ pātu tā idaṁ brahma kṣatraṁ pāntu tasmai svāhā। kāmāya gandharvāyedaṁ॥ 51॥

51. The dear one, looking with desire, Love is the Celestial Harmony; his manifest potential are thoughts (called) burning; May he protect this .....

ताभ्यः स्वाहा। आधिभ्योऽप्सरोभ्य इदं ॥५२॥
tābhyaḥ svāhā। ādhibhyo'psarobhya idaṁ॥ 52॥

स नो भुवनस्य पते यस्य त उपरि गृहा इह च। ऊरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा । भुवनस्य पतये ब्रह्मण इदं ॥५३॥
sa no bhuvanasya pate yasya ta upari gṛhā iha ca। ūru brahmaṇe'smai kṣatrāya mahi śarma yaccha svāhā। bhuvanasya patye brahmaṇa idaṁ॥ 53॥

O lord of the world, who dwells above and below, please grant extensive, great protection to this Spiritual Dominion and to this Temporal Dominion and grant us peace for ever.

UTTARĀṄGAM

Conclusion

ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत् कामस्ते जुहुमस्तन्नो अस्तु वयग्गस् स्याम पतयो रयीणाग्गस्स्वाहा॥ प्रजापतय इदं न मम।
oṁ prajāpate na tvad etānyanyo viśvā jātāni pari tā babhūva। yat kāmas te juhumas tanno astu vayaggas syāma patayo rayīṇāggas svāhā॥ prajāpataya idaṁ na mama॥

O Lord of Beings, you alone can comprehend all these created forms, and none beside you. Grant us our heart's desire when we invoke you, may we become the lords of rich possessions. (VS. 10;20)

ॐ भूस्स्वाहा॑। अग्नये इदं न मम ॥ oṁ bhūssvāhā̎ । agnaye idaṁ na mama ॥
ॐ भुवस्स्वाहा॑। वायवे इदं न मम ॥ oṁ bhuvassvāhā̎ । vāyave idaṁ na mama ॥
ॐ सुवस्स्वाहा॑। सूर्याय इदं न मम ॥ oṁ suvassvāhā̎ । sūryāya idaṁ na mama ॥

यद् अ॑स्य॒ कर्म॒णोऽत्यरी॑रिचं॒ यद्वा॒ न्यू॑नम् इ॒हाक॑रम्। अग्निष्टत् स्विष्टकृद् विद्वान् सर्वग्गस्स्विष्ट॒गुं सुहु॑तं करोतु॒ स्वाहा। अग्नये स्विष्टकृतेदं न मम ॥

yad a॑sya॒ karma॒ṇo 'tyarī॑rica॒ṁ yad vā॒ nyū॑nam i॒hāka॑ram । agniṣṭa॒t sviṣṭa॒-kṛd vidvān sarvaggas svi॑ṣṭa॒guṁ suhu॑ta॒ṁ karotu॒ svāhā । agnaye sviṣṭakṛtedaṁ na mama ॥

Whatever there has been done that is superfluous or deficient in this sacrifice, you know it all, please accept it as complete O Agni Svistakrta.

Paridhi pariharaṇam;

❖ *Offer the paridhis into the fire after having dipped them in ghee; the middle one first followed by the three others.*

Samsrāva Homaḥ

❖ *Fill the sruva with ghee then cover with the sruk then offer a continuous stream of ghee;*

स्वाहा॑। वसुभ्यो रुद्रेभ्य आदितेभ्यः संस्राव भागेभ्यः इदं न मम ॥
svāhā̎ । vasubhyo rudrebhya āditebhyaḥ saṁsrāva bhāgebhyaḥ idaṁ na mama ॥

All Hail! To the Vaus, the Rudras and the Adityas I offer this oblation.

ॐ भूर्भुवस्सुवस्स्वाहा॑। प्रजापतये इदं न मम ॥
oṁ bhūr-bhuvaḥ suvaḥ svāhā̎ । prajāpataye idaṁ na mama ॥

To The Physical, Mental and Spiritual realms All Hail, to the Lord of Creation I make this offering.

PAÑCA-VARUṆA HOMA

इ॒मं मे॑ वरुण श्रुधी॒ हव॑म् अ॒द्याच॑ मृडय। त्वाम् अ॑व॒स्युराच॑के स्वाहा॑॥ वरुणायेदम् न मम ॥
i॒maṁ me॑ varuṇa śrudhī॒ hava॑m a॒dyāca॑ mṛ॒ḍaya । tvām a॑va॒syurāca॑ke svāhā̎॥ varuṇāyedam na mama ॥

तत् त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑ मानस्त॒दा शा॑स्ते॒ यज॑मानो ह॒विर्भिः। अहे॑डमानो वरुणे॒ह बो॒ध्युरु॑शगुं स॒ मा न॒ आयुः॒ प्रमोषीः स्वाहा॑। वरुणायेदम् न मम ॥
tat tvā॑ yāmi॒ brahma॑ṇā॒ vanda॑ mānas ta॒dā śā॑ste॒ yaja॑māno ha॒virbhi॑ḥ । ahe॑ḍamāno varuṇe॒ha bo॒dhyuru॑śaguṁ sa॒ mā na॒ āyu॒ḥ pramoṣī॒ḥ svāhā̎ । varuṇāyedam na mama ॥

त्वन्नो॑ अग्ने॒ वरु॑णस्य॒ वि॒द्वान् दे॒वस्य॒ हेडो॑ऽव॑यासि सिष्ठाः। यजि॑ष्ठो वह्नि तम॒ः शोशु॑चानो॒ विश्वा॒ द्वेषाग्गुं॑सि प्रमु॑म् उग्ध्य॒स्मत् स्वाहा॑ । अग्नि-वरुणाभ्याम् इदं न मम ॥
tvanno॑ agne॒ varu॑ṇasya॒ vi॒dvān de॒vasya he॒ḍo 'va॑yāsi si॒ṣṭhāḥ । yaji॑ṣṭho vahni tama॒ḥ śośucāno॒ viśvā॒ dveṣāguṁsi pramu॑m ugdhya॒smat svāhā̎ । agni-varuṇābhyām idaṁ na mama ॥

स त्वन्नो॑ अग्ने ऽव॒मो भ॑वो॒ति नेदि॑ष्ठो अ॒स्य उ॒षसो॒ व्यु॑ष्टौ। अव॑यक्ष्व नो॒ वरु॑णगुं ररा॑णो वी॒हि मृ॑ड़ी॒कगुं सु॒हवो॑ न एधि स्वाहा॑। अग्नि-वरुणाभ्याम् इदं न मम ॥

sa tvanno agne 'vamo bhavoti nediṣṭho asya uṣaso vyuṣṭau । avayakṣva no varuṇaguṁ rarāṇo vīhi mṛḍīkaguṁ suhavo na edhi svāhā । agni-varuṇābhyām idaṁ na mama ॥

त्वम् अग्ने अयास्य यासन् मनसा हितः । अयासन् हव्यम् ऊहिषे यानो धेहि भेषजग्गस्स्वाहा । अग्नि-अयसे इदं न मम ॥

tvam agne ayāsya yāsan manasā hitaḥ । ayāsan havyam ūhiṣe yāno dhehi bheṣajaggaḥ svāhā । agni-ayase idaṁ na mama ॥

आभिर्गीर्भिर्यदतो न ऊनम् । आप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि ।
भूयिष्ठभाजो अध ते स्याम स्वाहा ॥ इन्द्राय हरिवत इदं ॥

ābhir-gīrbhir-yadato na ūnam । āpyāyaya harivo vardhamānaḥ । yadā stoṭṛbhyo mahi gotrā rujāsi । bhūyiṣṭhabhājo adha te syāma svāhā ॥ indrāya harivata idaṁ ॥

यद् विद्वांसो यद् अविद्वांसो मुग्धाः कुर्वन् ऋत्विजः । अग्निर् मा तस्माद् एनसः श्रद्धा देवी च मुचता स्वाहा ॥ अग्नये श्रद्धा-देव्या इदं ॥

yad vidvāṁso yad avidvāṁso mugdhāḥ kurvan ṛtvijaḥ । agnir mā tasmād enasaḥ śraddhā devī ca mucatā svāhā ॥ agnaye śraddhā-devyā idaṁ ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढम् अस्य पागुँ सुरे ॥

idaṁ viṣṇur vicakrame tredhā nidadhe padam । samūḍham asya pāgm ̐ sure ॥

ॐ त्र्यम्बकम् यजामहे सुगन्धिं पुष्टि वर्धनम् । ऊर्वारुकम् इव बन्धनान् मृत्योर्मुक्षीय माऽमृतात्स्वाहा ॥

oṁ tryambakam yajāmahe sugandhiṁ puṣṭi vardhanam । ūrvārukam iva bandhanān mṛtyor mukṣīya mā'mrutāt svāhā ॥

ॐ पुनस्त्वा ऽऽदित्या रुद्रा वसवः समिन्धताम् । पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तन्वं वर्धयस्व । सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥ अग्नये वसुनीथायेदं ॥

oṁ punastvā ''dityā rudrā vasavas samindhatām । punar brahmāṇo vasunītha yajñaiḥ । ghṛtena tvaṁ tanvaṁ vardhayasva । satyās santu yajamānasya kāmāḥ svāhā ॥ agnaye vasunīthāyedaṁ ॥

PRĀYAŚCITTA

Atonement

Saṅkalpaḥ — ॐ पूर्वोक्त गुण विशेषेण विसिष्ठायां अस्यां शुभ तिथौ मम उपात समस्त दुरित-क्षय द्वार श्री परमेश्वर प्रीत्यर्थं अस्मिन् _____ होम कर्मणि अविज्ञात प्रायश्चित्त आदीनि करिष्ये॥

oṁ pūrvokta guṇa viśeṣeṇa visiṣṭhāyāṁ asyāṁ śubha tithau mama upāta samasta durita-kṣaya dvāra śrī parameśvara prītyarthaṁ asmin _____ homa karmaṇi avijñāta prāyaścitta ādīni kariṣye ॥

On this auspicious day characterized by the afore mentioned Astrological parameters, with the sanction of the Supreme Person and as service to Him alone , in this rite of kushmanda homa I shall now make the atonement offerings.

अनाज्ञातं यद् अज्ञातं यज्ञस्य क्रियते मिथु । अग्ने तदस्य कल्पय त्वगुं हि वेत्थ यथा तथगस्स्वाहा ॥ अग्नयेदं न मम ॥

anājñātaṁ yad ajñātaṁ yajñasya kriyate mithu । agne tadasya kalpaya tvaguṁ hi vettha yathā tathagass svāhā ॥ agnayedaṁ na mama ॥

Whatever error I may have committed in this sacrifice, knowingly or unknowingly, O Agni you know full well, please amend it and make it perfect. (TB.3.7.11.5.)

पुरुष सम्मितो यज्ञो यज्ञः पुरुष सम्मितः । अग्ने तदस्य कल्पय त्वगुं हि वेत्थ यथा तथगस्स्वाहा ॥ अग्नयेदं न मम ॥

puruṣa sammito yajño yajñaḥ puruṣa sammitaḥ । agne tadasya kalpaya tvaguṁ hi vettha yathā tathagass svāhā ॥ agnayedaṁ na mama ॥

The Supreme Lord is coequal with Sacrifice, the Sacrifice is coequal with the Lord. O Agni you know full well, please amend it and make it perfect. (TB.3.7.11.5)

यत् पाकत्र मनसा दीन दक्षा न । यज्ञस्य मन्वते मर्तासः ।
अग्निष्टद् होता क्रतु-विद् विजानन् यजिष्ठो देवागुं क्रतुशो यजाति स्वाहा ॥ अग्नयेदं न मम ॥

yat pākatra manasā dīna dakṣā na । yajñasya manvate martāsaḥ । agniṣṭad hotā kratu-vid vijānan yajiṣṭho devāguṁ kratuśo yajāti svāhā ॥ agnayedaṁ na mama ॥

Since we humans of feeble energies, with immature minds, are unacquainted with the correct procedure of sacrifice, may the Mystic Fire who is skilled in the rites, well knowing all that is to be done, the best offerer, offer worship (on our behalf) according to fit season. (RV.10.2.5a)

ॐ भूस्स्वाहा । अग्नये इदं न मम ॥	oṁ bhūssvāhā । agnaye idaṁ na mama ॥
ॐ भुवस्स्वाहा । वायवे इदं न मम ॥	oṁ bhuvassvāhā । vāyave idaṁ na mama ॥
ॐ सुवस्स्वाहा । सूर्याय इदं न मम ॥	oṁ suvassvāhā । sūryāya idaṁ na mama ॥

Saṅkalpaḥ अस्मिन् _____ होम कर्मणि मध्ये संभावित समस्त दोष प्रायश्चित्तार्थं सर्व प्रायश्चित्तं होष्यामि ॥

asmin _____ homa karmaṇi madhye saṁbhāvita samasta doṣa prāyaścittārthaṁ sarva prāyaścittaṁ hoṣyāmi ॥

For all shortcomings that occurred during the course of this sacrifice I now offer final atonement and expiation.

ॐ भूर्भुवस्सुवः स्वाहा । प्रजापतये इदं न मम ॥

oṁ bhūr-bhuvaḥ suvaḥ svāhā । prajāpataye idaṁ na mama ॥

Om To the physical, mental and transcendental realms All Hail!

ॐ श्री विष्णवे-स्वाहा । विष्णवे परमात्मने इदं न मम ॥

oṁ śrī viṣṇave-svāhā । viṣṇave paramātmane idaṁ na mama ॥

Om, To the Omnipresent Lord All Hail!

ॐ रुद्राय पशुपतये स्वाहा । रुद्राय पशुपतये इदं न मम ॥

oṁ rudrāya paśupataye svāhā । rudrāya paśupataye idaṁ na mama ॥

Om, To the Destroyer, the Lord of all beings, All Hail!

DVĀDAŚA NĀMA HOMA

Saṅkalpaḥ — ॐ एवं पूर्वोक्त गुण विशेषण विसिष्ठायां अस्यां शुभ तिथौ भगवद् आज्ञया भगवद् कैङ्कर्य रूपेण एतत् कर्म सादुण्यार्थं केशवादि द्वादश होमं होष्यमि ॥

oṁ evaṁ pūrvokta guṇa viśeṣaṇa visiṣṭhāyāṁ asyāṁ śubha tithau bhagavad ājñayā bhagavad kaiṅkarya rūpeṇa etat karma sādguṇyārthaṁ keśavādi dvādaśa homaṁ hoṣyami ॥

ॐ केशवाय स्वाहा । नारायणाय । माधवाय । गोविन्दाय । विष्णवे । मधुसूदनाय । त्रिकिव्रमाय । वामनाय । श्रीधराय । हृषीकेशाय । पद्मनाभाय । दामोदराय ॥

oṁ keśavāya svāhā । nārāyaṇāya । mādhavāya । govindāya । viṣṇave । madhusūdanāya । trikivramāya । vāmanāya । śrīdharāya । hṛṣīkeśāya । padmanābhāya । dāmodarāya ॥

MAHĀ PŪRṆĀHUTI

Sankalpam — ॐ एवं पूर्वोक्त गुण विशेषण विसिष्ठायां अस्यां शुभ तिथौ भगवद् आज्ञया भगवद् कैङ्कर्य रूपेण अस्मिन् प्रतिष्ठाकर्मणि सम्पूर्ण फल प्राप्यर्थं वैष्णव करण नामग्नौ पूर्णाहुतिं होष्यामि ॥

oṁ evaṁ pūrvokta guṇa viśeṣaṇa visiṣṭhāyāṁ asyāṁ śubha tithau bhagavad ājñayā bhagavad kaiṅkarya rūpeṇa asmin pratiṣṭhākarmaṇi sampūrṇa phala prāpyarthaṁ vaiṣṇava karaṇa nāmagnau pūrṇāhutiṁ hoṣyāmi ॥

Om. On this auspicious day, endowed with the aforementioned virtues and qualities, by the divine command of the Lord and in the spirit of service to the divine, I shall offer the Purnahuti (final oblation) into this sacred fire named Vaishnava Karana Agni during this Pratishtha ritual, for the attainment of complete success and fruition of the ceremony.

ॐ सप्त॒ ते॑ अग्ने स॒मिध॑: स॒प्त जि॒ह्वा: सप्त ऋ॒षय॑: सप्त॒ धाम॑ प्रि॒याणि॑ । स॒प्त होत्रा॑: सप्त॒धा त्वा॑ यजन्ति स॒प्त योनि॒रापृ॑णस्व घृ॒तेन॒ स्वाहा॑ ॥ अग्नये सप्तवतेदं न मम ॥

oṁ sapta te agne samidhas sapta jihvās sapta ṛṣayaḥ sapta dhāma priyāṇi । sapta hotrā sapta-dhā tvā yajanti sapta yonir āpṛṇasva ghṛtena svāhā ॥ agnaye saptavatedaṁ na mama ॥

Om. O Agni, you have seven flames, seven tongues, seven sages (rays), and seven abodes that are dear. Seven priests worship you in seven forms, offering oblations in sevenfold ways. Accept this offering with ghee, O Agni, the origin of sevenfold creation.

पूर्णा प॒श्चादु॒त पूर्णा पु॒रस्ता॑त् । उन्म॑ध्य॒तः पौर्ण॑मा॒सी जि॑गाय ।
तस्यां॑ दे॒वा अधि॑ सं॒वस॑न्तः । उ॒त्त॒मे नाक॑ इ॒ह मा॑दयन्तां ॥

pūrṇā paścād uta pūrṇā purastāt । unmadhyataḥ paurṇamāsī jigāya ।
tasyāṁ devā adhi saṁvasantaḥ । uttame nāka iha mādayantāṁ ॥

"Fullness is behind, and fullness is ahead. In the middle, the full moon arises. On that day, the gods dwell together. May they delight in the highest heavens and bring joy here.

यत्ते॑ दे॒वा अद॑धुर्-भाग॒-धेय॒म् अमा॑वास्ये सं॒वस॑न्तो महि॒त्वा । सा नो॑ य॒ज्ञं पि॑पृहि विश्ववारे र॒यिं नो॑ धेहि सुभगे सुवी॒रं स्वाहा ॥ अग्नये पूर्णहुतये इदं ॥

yatte devā adadhur-bhāga-dheyam amāvāsye saṁvasanto mahitvā । sā no yajñaṁ pipṛhi viśvavāre rayiṁ no dhehi subhage suvīraṁ svāhā ॥ agnaye pūrṇahutaye idaṁ ॥

What portion of the offering the gods assigned to you, dwelling together in your greatness on the new moon (Amavasya), May that bless and sustain our sacrifice, O all-encompassing one (Vishvavara). Grant us wealth, O auspicious one, along with noble offspring and strength."

ॐ पूर्णाहुतिम् उ॑त्त॒मां जु॑होति । सर्वं॑ वै पू॑र्णा-हुतिः । सर्वम् एवाप्नो॑ति । अथो॑ इ॒यं वै पू॑र्णा-हुतिः । अ॒स्याम् ए॒व प्रति-तिष्ठति॑ स्वाहा॑ ॥ अग्नये वौषट् ॥

oṁ pūrṇāhutim uttamāṁ juhoti । sarvaṁ vai pūrṇā-hutiḥ । sarvam evāpnoti । atho iyaṁ vai pūrṇā-hutiḥ । asyām eva prati-tiṣṭhati svāhā ॥ agnaye vauṣaṭh ॥

He sacrifices the best of final oblations; Totality is the final oblation; through that everything is obtained ; therefore is this, that final oblation; in this is it established.

VASORDHĀRA HOMAḤ

ॐ सप्त॒ ते॑ अग्ने स॒मिध॑: स॒प्त जि॒ह्वा: सप्त ऋ॒षय॑: सप्त॒ धाम॑ प्रि॒याणि॑ । स॒प्त होत्रा॑: सप्त॒-धा त्वा॑ यजन्ति स॒प्त योनि॒रापृ॑णस्व घृ॒तेन॒ स्वाहा॑ ॥ अग्नये सप्तवतेदं न मम ॥

oṁ sapta te agne samidhaḥ sapta jihvāḥ sapta ṛṣayaḥ sapta dhāma priyāṇi । sapta hotrā sapta-dhā tvā yajanti sapta yonir āpṛṇasva ghṛtena svāhā ॥ agnaye saptavatedaṁ na mama ॥

Seven are your faggots O Agni, seven your tongues, seven the seers and seven the beloved locations. Seven are the priests that oblate to you, seven are the sources, with this oblation of ghee grant us protection. (KYV. 1.5.3.2)

Prāṇāyāma & Pariśecanam

अदितेऽन्वमगस्स्थाः । अनुमतेऽन्वमगस्स्थाः । सरस्वतेऽन्वमगस्स्थाः । देव सवितः प्रासावीः ॥

aditeʼnvamagass sthāḥ । anumateʼnvamagass sthāḥ ।
sarasvateʼnvamagass sthāḥ । deva savitaḥ prāsāvīḥ ॥

Aditi has granted us permission, Anumati has granted permission. Sarasvati has granted permission, Deva Savita has impelled us.

❖ *Valediction of Varuna from the pranīta patra*

वरुणाय नमः सकल अराधनै स्वर्चितम् । यथा-स्थानं ....
varuṇāya namaḥ sakala arādhanai svarcitam । yathā-sthānaṁ ....

O Varuna I offer you all my homage, please depart where you will, for Glory, well-being and the hope that you will return.

❖ *Raise the pranīta-pātra*

सदसि सन्मे भूयाः पूर्णमसि पूर्णं मे भूयाः अक्षितमसि मा मेक्षेष्ठाः ॥
sadasi sanme bhūyāḥ pūrṇamasi pūrṇam me bhūyāḥ akṣitam asi mā mekṣeṣṭhāḥ ॥

May there be goodness (truth) for me in the assembly. You are complete; may I too attain completeness. You are imperishable; may I not be diminished.

❖ *Pouring out of the water*

प्राच्यां दिशी देवा ऋत्विजो मार्जयन्ताम् ॥
prācyāṁ diśī devā ṛtvijo mārjayantām ॥
In the eastern quarter may the gods, the priests make me bright.

दक्षिणस्य दिशी मासाः पितरो मार्जयन्ताम् ॥
dakṣiṇasya diśī māsāḥ pitaro mārjayantām ॥
In the southern quarter may the months, the manes make me illustrious.

प्रतीच्यां दिशी गृहाः पशवो मार्जयन्ताम् ॥
pratīcyāṁ diśī gṛhāḥ paśavo mārjayantām ॥
In the western quarter may the houses, the cattle make me illustrious.

उदीच्यां दिश्यापः ओषधयो मार्जयन्ताम् ॥
udīcyāṁ diśyāpa oṣadhayo mārjayantām ॥
In the northern quarter may the waters, the plants, the trees make me illustrious.

ऊर्ध्वायां दिशी यज्ञ संवत्सरो यज्ञ-पतिर् मार्जयन्ताम्
ūrdhvāyāṁ diśī yajña saṁvatsaro yajña-patir mārjayantām ॥
In the zenith may the sacrifice, the year, the Lord of Sacrifice make me illustrious.

❖ *Pour the rest of the water into the hands of the yajamāna's wife with the mantra:—*

समुद्रं वः प्रहिणोमि स्वां योनिम् अपि-गच्छत । अच्छिद्रः प्रजया भूयासं मा परासेचि मत् पयः ॥
samudraṁ vaḥ prahiṇomi svāṁ yonim api-gacchata ।
acchidraḥ prajayā bhūyāsaṁ mā parāseci mat payaḥ ॥

I send you back to the ocean, your own source. Return to your origin. May I remain unbroken in my lineage, and may my essence (milk or vitality) not be wasted or lost.

❖ *In her absence sprinkle it over the head of the yajamāna.*

ॐ वैश्वानरायं विद्महे। लालीलायं धीमहि। तन्नो अग्निः प्रचोदयात्॥
oṁ vaiśvānarāya vidmahe। lālīlāya dhīmahi। tanno agniḥ pracodayāt॥
We cognize the Mystic Fire within the soul of all beings, may that Illuminator enlighten us.

Agnir upasthānam

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वन्।
युयोध्यस्मज्जुहुराणम् एनो भूयिष्ठान्ते नम उक्तिं विधेम॥ ॐ अग्नये नमः अग्निं आत्मन्युद्वासयामि॥
agne naya supathā rāye asmān viśvāni deva vayunāni vidvan।
yuyodhyasmajjuhurāṇam eno bhūyiṣṭhānte nama uktiṁ vidhema॥
oṁ agnaye namaḥ agniṁ ātmanyudvāsayāmi॥
O Refulgent Agni you possess all kinds of knowledge and are therefore wise. Lead us in a goodly path to the wealth of Beatitude. Keep away from us corrupting sin which stands in the way of our attainment. We offer you many salutations. Om Obeisance to Agni - I return you to your place within my heart

Prārthana

नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये। आहवनीयाय महावेद्यै नमो नमः॥
namaste gārhapatyāya namaste dakṣiṇāgnaye।
āhavanīyāya mahāvedyai namo namaḥ॥
"Salutations to the gārhapatya fire, salutations to the dakṣiṇāgni fire. Salutations again and again to the āhavanīya fire and the great altar.

काण्ड द्वयोपपध्याय कर्म ब्रह्म स्वरूपिणम्। स्वर्गापवर्ग रूपाय यज्ञेशाय नमो नमः॥
kāṇḍa dvayopapadhyāya karma brahma svarūpiṇam।
svargāpavarga rūpāya yajñeśāya namo namaḥ॥
Salutations to the lord of sacrifices, who is the form of Brahman in the ritual, who is the form of heaven and liberation, and who presides over the sacrifice.

यज्ञेशाच्युत गोविन्द माधवानन्त केशव। कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तुते॥
yajñeśācyuta govinda mādhavānanta keśava।
kṛṣṇa viṣṇo hṛṣīkeśa vāsudeva namo'stute॥
Salutations to the lord of sacrifices, to Achyuta (the infallible), to Govinda, to Madhava, to Ananta (the infinite), to Keshava. Salutations to Krishna, to Vishnu, to Hrishikesha (lord of the senses), to Vasudeva.

मन्त्र हीनं क्रिया हीनं भक्ति हीनं हुताशन। यधुतं तु मया देव परिपूर्णं तदस्तु ते॥
mantrahīnaṁ kriyāhīnaṁ bhaktihīnaṁ hutāśana।
yadhutaṁ tu mayā deva paripūrṇaṁ tadastu te॥
O Agni, whatever has been performed by me without mantras, without proper rituals, or without devotion, may that be completed and fulfilled for you.

प्रायश्चित्त अन्य शेषाणि तपः कर्मात्मकानि वै। तानि तेषाम् अशेषाणां कृष्णा अनुस्मरणं परम्॥
prāyaścitta anya śeṣāṇi tapaḥ karmātmakāni vai।
tāni teṣām aśeṣāṇāṁ kṛṣṇā anusmaraṇaṁ param॥
The supreme atonement for all other remaining acts of penance and rituals is the constant remembrance of Krishna.

यस्य स्मृत्या च नामोक्त्या जप होम क्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम्॥
yasya smṛtyā ca nāmoktyā japa homa kriyādiṣu।
nyūnaṁ saṁpūrṇatāṁ yāti sadyo vande tamacyutam॥

By remembering and chanting His name during japa, homa, and other rituals, even if there are deficiencies, they are immediately perfected. I bow to that Achyuta.

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् । स्मरणादेव तद्विष्णोः संपूर्णं स्याद् इति श्रुतिः ॥
pramādāt kurvatāṁ karma pracyavetādhvareṣu yat ।
smaraṇādeva tadviṣṇoḥ saṁpūrṇaṁ syād iti śrutiḥ ॥

If, due to negligence, any errors occur during the performance of rituals, simply by remembering Vishnu, they are perfected. This is the declaration of the Vedas."

श्री कृष्ण कृष्ण कृष्ण śrī kṛṣṇa kṛṣṇa kṛṣṇa

- *Pour a handfull of water and akṣata on the ground with;*

अनेन होमेन यज्ञ-स्वरूपी भगवान् वासुदेव प्रीयतां ॥
anena homena yajña-svarūpī bhagavān vāsudeva prīyatāṁ ॥

MAHĀ KUMBHA ABHIṢEKAM

- *All the mūrti kumbhas are now taken in procession with maṅgala vādya and placed in their respective places in front of the various shrines and deities.*
- *The Śikhara kumbhas are taken and poured over the Domes of the temple.*

MŪRTI ABHIṢEKAM

- *Then perform the Mahābhiṣekam as before.*
- *Recite the following mantra when doing the sahasra-dhāra abhiṣekam*

तागुं-सं॒वि॒तुर्वरे॑ण्यस्य चि॒त्रामा॑ऽहं वृ॑णे सुम॒तिं वि॒श्वज॑न्याम् ।
याम॑स्य॒ कण्वो॒ अदु॑ह॒त्-प्रपी॑नागुं स॒हस्र॑धारां॒ पय॑सा म॒हीं गाम् ॥
tāguṁ-sa॑vi॒tur vare॑ṇyasya ci॒trāmā॑'haṁ vṛ॑ṇe sumati॑ṁ vi॒śvaja॑nyām ।
yāma॑sya॒ kaṇvo॒ adu॑ha॒t-prapī॑nāguṁ sa॒hasra॑dhārā॒ṁ paya॑sā ma॒hīṁ gām ॥

"I choose the splendid favor of that Savitri, the most venerable, and the universal wisdom. Kanva milked out the sweet, abundant, thousand-streamed milk from the cow of the earth."

- *Dry the bera and do alaṅkāram.*
- *Prepare the maṅgala dravyam and place them in front of the Lord;—*

A cow, well-dressed virgin, durva, turmeric, honey, akṣata, nava-dhānyam, śaṅkha, cakra, gadā, padma, khadga, pātaka, bheri, darpaṇam, kumbha, matsya-yugma.

LAGHU BHŪTA ŚUDDHI

- *The acarya sprinkles the ground with*

ॐ यं शोषयामि । ॐ रं दाहयामि । ॐ वं प्लावयामि ॥
oṁ yaṁ śoṣayāmi । oṁ raṁ dāhayāmi । oṁ vaṁ plāvayāmi ॥

- *Do prāṇāyāma 10 times with the āṣṭākṣāri.*

Sankalpaḥ — ॐ एवं पूर्वोक्त ……. अस्मिन् प्रतिष्ठा कर्मणि ईज्याख्यं भगवद् आराधनं तद् अङ्गत्वेन लघु भूत-शुद्धिं करिष्ये.
oṁ evaṁ pūrvokta ……. asmin pratiṣṭhā karmaṇi ījyākhyaṁ bhagavad ārādhanaṁ tad aṅgatvena laghu bhūta-śuddhiṁ kariṣye.

Ring bell.	ॐ सहस्रार हुं	oṁ sahasrāra huṁ
Show Agni-prakāra mudra;	ॐ रं नमः पाराय कालानलात्मने	oṁ raṁ namaḥ pārāya kālānalātmane.
Show Cakra mudra above the head;	ॐ नमो भगवते सुदर्शनाय	oṁ namo bhagavate sudarśanāya

Sa-pavitri do 3 prāṇāyāmas.

VISUALIZATIONS;

1. Navel	A grey coloured square	vāyu bīja	यं - yaṁ
2. Heart	A red triangle within a lotus	agni bīja	रं - raṁ
3. Throat	A yellow square	pṛthivī bīja	लं - laṁ
4. Crown	A crystal circle	amṛta bīja	वं - vaṁ

- *Recite the pañcopaniṣad mantras while touching the parts of the body indicated;*

ॐ लं नमः पराय सर्वात्मने नारायणाय नमः
oṁ laṁ namaḥ parāya sarvātmane nārāyaṇāya namaḥ (feet)
ॐ वां नमः पराय निवृत्त्यात्मने अनिरुद्धाय नमः
oṁ vāṁ namaḥ parāya nivṛttyātmane aniruddhāya namaḥ (genitals)
ॐ रां नमः पराय विश्वात्मने प्रद्युम्नाय नमः
oṁ rāṁ namaḥ parāya viśvātmane pradyumnāya namaḥ (heart)
ॐ यां नमः पराय पुरुषात्मने संकर्षनाय नमः
oṁ yāṁ namaḥ parāya puruṣātmane saṁkarṣanāya namaḥ (nose)
ॐ षौं नमः पराय परमेष्ट्यात्मने वासुदेवाय नमः
oṁ ṣauṁ namaḥ parāya parameṣṭyātmane vāsudevāya namaḥ (head)

- *Visualize that the physical body is being burnt up and a new spiritual body is being generated; then repeat the process in the inverse order, touching from head to feet.*

BHAGAVAD ĀRĀDHANAM

MĀNASIKA PŪJĀ

- *Perform mental worship of the Lord through mudras*

ॐ लं पृथिव्यात्मने गन्धं परिकल्पयामि ।	oṁ laṁ pṛthivyātmane gandhaṁ parikalpayāmi ।
ॐ हं आकाशात्मने पुष्पं परिकल्पयामि ।	oṁ haṁ ākāśātmane puṣpaṁ parikalpayāmi ।
ॐ यं वायुरात्मने धूपं परिकल्पयामि ।	oṁ yaṁ vāyurātmane dhūpaṁ parikalpayāmi ।
ॐ रं तेजात्मने दीपं परिकल्पयामि ।	oṁ raṁ tejātmane dīpaṁ parikalpayāmi ।
ॐ वं अमृतात्मने नैवेद्यं परिकल्पयामि ।	oṁ vaṁ amṛtātmane naivedyaṁ parikalpayāmi ।
ॐ सं सर्वात्मने ताम्बूलं परिकल्पयामि ।	oṁ saṁ sarvātmane tāmbūlaṁ parikalpayāmi ।

PĀTRA-KALPANAM

- *Fill the Tirukāveri with water and add some parimala-gandham.*
- *Show surabhi (dhenu) mudra; oṁ surabhi mudrāyai namaḥ*
- *Repeat pavitra mantra;*
- *Pavitra Mantra*

भगवन् पवित्रं वासुदेव पवित्रं, तत् पादौ पवित्रं, तत् पादोदकं पवित्रं, शत धारं, सहस्र धारं, अपरिमित धारं, अच्छिद्रं अरिष्ठं अक्षय्यं अनन्तं अपरिमितं परमं पवित्रं भगवन् वासुदेवः पुनातु ॥

bhagavan pavitraṁ vāsudeva pavitraṁ, tat pādau pavitraṁ, tat pādodakaṁ pavitraṁ, śata dhāraṁ, sahasra dhāraṁ, aparimita dhāraṁ, acchidraṁ ariṣṭhaṁ akṣayyaṁ anantam aparimitam paramaṁ

pavitraṁ bhagavan vāsudevaḥ punātu ॥

- *Do avaguṇṭanam;* ॐ वीर्याय अस्त्राय फट् । oṁ vīryāya astrāya phaṭ ।
- *Take water from the tirukāveri with the uddhariṇi in the left hand, raise it to the level of the face, covering it with the right hand, repeat the mūla mantra 4 times;*

ॐ विं विरजायै नमः ॥ oṁ viṁ virajāyai namaḥ ।

- *Return the water to the tirukaveri, and then fill the pañcapātra with the sanctified water. Repeat the mantra;* ॐ ज्ञानाय हृदयाय नमः । oṁ jñānāya hṛdayāya namaḥ ।
- *Touch each of the pātras in turn repeating ;*

१. ॐ नमो नारायणाय अर्घ्यं परिकल्पयामि ।
1. oṁ namo nārāyaṇāya arghyaṁ parikalpayāmi ।
२. ॐ नमो नारायणाय पाद्यं परिकल्पयामि ।
2. oṁ namo nārāyaṇāya pādyaṁ parikalpayāmi ।
३. ॐ नमो नारायणाय आचमनियं परिकल्पयामि ।
3. oṁ namo nārāyaṇāya ācamaniyaṁ parikalpayāmi ।
४. ॐ नमो नारायणाय स्नानियं परिकल्पयामि ।
4. oṁ namo nārāyaṇāya snāniyaṁ parikalpayāmi ।
५. ॐ नमो नारायणाय शुद्धोदकं परिकल्पयामि ।
5. oṁ namo nārāyaṇāya śuddhodakaṁ parikalpayāmi ।

[if offering to Lord Kṛṣṇa then the mūla mantra throughout is the dvādaśākṣari]

- *Salute the guru parampara and offer a flower;*

ॐ अस्मत् गुरुभ्यो नमः । oṁ asmat gurubhyo namaḥ ।

- *Salute the Lord, offer a flower and request permission to begin;*

ॐ समस्त परिवाराय श्रीमते नारायणाय नमः ।
भगवन् त्वद् प्राणप्रतिष्ठाय तथा आराधनाय मां अनुजानीहि ॥
oṁ samasta parivārāya śrīmate nārāyaṇāya namaḥ ।
bhagavan tvad prāṇapratiṣṭhāya tathā ārādhanāya māṁ anujānīhi ॥

- *Then perform nyāsa on the bera with the pañcopanisad mantra.*

ॐ षौं नमः पराय परमेष्ट्यात्मने वासुदेवाय नमः
oṁ ṣauṁ namaḥ parāya parameṣṭyātmane vāsudevāya namaḥ (head)
ॐ यां नमः पराय पुरुषात्मने संकर्षनाय नमः
oṁ yāṁ namaḥ parāya puruṣātmane saṁkarṣanāya namaḥ (mouth)
ॐ रां नमः पराय विश्वात्मने प्रद्युम्नाय नमः
oṁ rāṁ namaḥ parāya viśvātmane pradyumnāya namaḥ (navel)
ॐ वां नमः पराय निवृत्त्यात्मने अनिरुद्धाय नमः
oṁ vāṁ namaḥ parāya nivṛttyātmane aniruddhāya namaḥ (thighs)
ॐ लं नमः पराय सर्वात्मने नारायणाय नमः
oṁ laṁ namaḥ parāya sarvātmane nārāyaṇāya namaḥ (feet)

1. MANTRA ĀSANAM

The Mantra Enthronement

BHAGAVAD DHYANAM

वासुदेवात्मजं शान्तम् उज्ज्वलं सन्ततोदितम् । अनादि मध्य निधनम् एकञ्चाप्यचलं स्थिरम् ॥ १ ॥
vāsudevātmajaṁ śāntam ujjvalaṁ santatoditam ।
anādi madhya nidhanam ekañcāpyacalaṁ sthiram ॥ 1 ॥

"The son of Vasudeva, peaceful, bright, eternally manifest, Without beginning, middle, or end, one and immovable, steady."

चिद्धनं परमानन्दं तमसः परमव्यम् । ज्ञान शक्ति बलैश्वर्य वीर्य तेजस्समन्वितम् ॥ २ ॥
ciddhanaṁ paramānandaṁ tamasaḥ paramavyam ।
jñāna śakti balaiśvarya vīrya tejassamanvitam ॥ 2 ॥

"The wealth of consciousness, supreme bliss, beyond darkness, Endowed with knowledge, power, strength, sovereignty, heroism, and brilliance."

अपाणि पादम् अस्पृश्यम् अचक्षु-श्रवणादिकम् । सर्वतः कर-वाक्-पादं सर्वतोऽक्षि शिरोमुखं ॥ ३ ॥
apāṇi pādam aspṛśyam acakṣu-śravaṇādikam ।
sarvataḥ kara-vāk-pādaṁ sarvato'kṣi śiromukhaṁ ॥ 3 ॥

"Without hands or feet, untouchable, without eyes and ears, Present everywhere with hands, feet, speech, eyes, head, and face."

गतागत विनिर्मुक्तं रविकोटि समप्रभम् । चैतन्यं सर्वगं नित्यं व्योमातीतं तद् अद्भुतम् ॥ ४ ॥
gatāgata vinirmuktaṁ ravikoṭi samaprabham ।
caitanyaṁ sarvagaṁ nityaṁ vyomātītaṁ tad adbhutam ॥ 4 ॥

"Free from coming and going, shining like a million suns, Consciousness that pervades all, eternal, beyond the sky, that marvelous one."

चित्सामान्यं जगत्यस्मिन् मूल-मन्त्रात्मकं परम् । एवं विधं सदा विष्णुं आह्लादं प्रणवात्मकम् ॥ ५ ॥
citsāmānyaṁ jagatyasmin mūla-mantrātmakaṁ param ।
evaṁ vidhaṁ sadā viṣṇuṁ āhlādaṁ praṇavātmakam ॥ 5 ॥

"All pervading consciousness in this world, embodying the root mantra, supreme, Such is always Vishnu, the delight, embodied in the primal sound 'Om'."

तं नियुज्य महा-विष्णुं तद् विष्णौ विनियोजयेत् । विष्णुञ्च हृदये पद्मे समावाह्यार्चयेत् क्रमात् ॥ ६ ॥
taṁ niyujya mahā-viṣṇuṁ tad viṣṇau viniyojayet ।
viṣṇuñca hṛdaye padme samāvāhyārcayet kramāt ॥ 6 ॥

"Engaging that Maha-Vishnu, then placing him in Vishnu, And installing Vishnu in the lotus of the heart, one should worship accordingly."

❖ *Then invoke the Divine Presence;*

ॐ वं यां नमः पुरुषात्मने नमः । oṁ vaṁ yāṁ namaḥ puruṣātmane namaḥ ।

❖ *Imagine that the divine essence is pervading the bera from the brahmarandhra downwards;*

ॐ रं वां नमः पराय निवृत्यात्मने नमः । oṁ raṁ vāṁ namaḥ parāya nivṛtyātmane namaḥ

❖ *Do the nyasam*

ॐ पुरुषात्मने नमः ।	oṁ puruṣātmane namaḥ ।	head
ॐ प्राणात्मने नमः ।	oṁ prāṇātmane namaḥ ।	
ॐ प्रकृति तत्त्वाय नमः ।	oṁ prakṛti tattvāya namaḥ ।	heart
ॐ बुद्धितत्त्वय नमः ।	oṁ buddhitattvaya namaḥ ।	
ॐ शब्दतत्त्वाय नमः ।	oṁ śabdatattvāya namaḥ ।	ears
ॐ स्पर्शतत्त्वाय नमः ।	oṁ sparśatattvāya namaḥ ।	skin

ॐ रूपतत्त्वाय नमः ।	oṁ rūpatattvāya namaḥ ।	eyes
ॐ रसतत्त्वाय नमः ।	oṁ rasatattvāya namaḥ ।	tongue
ॐ गन्ध तत्त्वाय नमः ।	oṁ gandha tattvāya namaḥ ।	nose

Pīṭha Pūjā

ॐ आधारशक्त्यै नमः । अखिल जगदाधाराय कूर्म-रूपिणे नारायणाय । अनन्ताय नाग-राजाय । भूं भूम्यै । वैकुण्ठाय दिव्यलोकाय । श्री वैकुण्ठाय दिव्य-जन-पदाय । श्री वैकुण्ठाय दिव्य नगराय । श्री वैकुण्ठाय दिव्यविमानाय । अनन्द-मयाय दिव्य मण्टपाय । आस्तरण-रूपिणे अनन्ताय नागराजाय ॥

oṁ ādhāraśaktyai namaḥ । akhila jagadādhārāya kūrma-rūpiṇe nārāyaṇāya । anantāya nāga-rājāya । bhūṁ bhūmyai । vaikuṇṭhāya divyalokāya । śrī vaikuṇṭhāya divya-jana-padāya । śrī vaikuṇṭhāya divya nagarāya । śrī vaikuṇṭhāya divyavimānāya । ananda-mayāya divya maṇṭapāya । āstaraṇa-rūpiṇe anantāya nāgarājāya ॥

ॐ धर्माय पीठ-पादाय नमः । ज्ञानाय पीठ-पादाय । वैराग्याय पीठ-पादाय । ऐश्वर्याय पीठ-पादाय । ऋग्वेदाय पीठ-वाहकाय । यजुर्-वेदाय पीठ-वाहकाय । साम-वेदाय पीठ-वाहकाय । अथर्वण-वेदाय पीठ-वाहकाय । धर्माय पीठ-गात्राय । अधर्माय पीठ-गात्राय । अज्ञानाय पीठ-गात्राय । अवैराग्याय पीठ-गात्राय । अनैश्वर्याय पीठ-गात्राय । एभिः परिच्छिन्न-तनवे सदसद्-आत्मकाय । पीठ-भूताय नाग-राजाय । पीठस्योपरि अष्ट-दल-पद्माय । वह्नि मण्डलाय । सोम मण्डलाय । सूर्य मण्डलाय ॥

oṁ dharmāya pīṭha-pādāya namaḥ । jñānāya pīṭha-pādāya । vairāgyāya pīṭha-pādāya । aiśvaryāya pīṭha-pādāya । ṛgvedāya pīṭha-vāhakāya । Yajur-vedāya pīṭha-vāhakāya । sāma-vedāya pīṭha-vāhakāya । atharvaṇa-vedāya pīṭha-vāhakāya । dharmāya pīṭha-gātrāya । adharmāya pīṭha-gātrāya । ajñānāya pīṭha-gātrāya । avairāgyāya pīṭha-gātrāya । anaiśvaryāya pīṭha-gātrāya । ebhiḥ paricchinna-tanave sadasad-ātmakāya । pīṭha-bhūtāya nāga-rājāya । pīṭhasyopari aṣṭa-dala-padmāya । vahni maṇḍalāya । soma maṇḍalāya । sūrya maṇḍalāya ॥

ॐ विमलायै चामर-हस्तायै नमः । उत्कर्षिण्यै चामर-हस्तायै । ज्ञानायै चामर-हस्तायै । क्रियायै चामर-हस्तायै । प्रह्व्यै चामर-हस्तायै । सत्यायै चामर-हस्तायै । ईशानायै चामर-हस्तायै । योगायै चामर-हस्तायै । अनुग्रहायै चामर-हस्तायै ॥

oṁ vimalāyai cāmara-hastāyai namaḥ । utkarṣiṇyai cāmara-hastāyai । jñānāyai cāmara-hastāyai । kriyāyai cāmara-hastāyai । prahvyai cāmara-hastāyai । satyāyai cāmara-hastāyai । īśānāyai cāmara-hastāyai । yogāyai cāmara-hastāyai । anugrahāyai cāmara-hastāyai ॥

ॐ जगत्-प्रकृतये दिव्य योग-पीठाय नमः । दिव्य योग पर्यङ्काय । सहस्र-शीर्षाय अनन्त नाग-राजाय । पुरतः भगवद् पाद-पीठाय । भगवत्-पादुकाभ्यां ॥

oṁ jagat-prakṛtaye divya yoga-pīṭhāya namaḥ । divya yoga paryaṅkāya । sahasra-śīrṣāya ananta nāga-rājāya । puratah bhagavad pāda-pīṭhāya । bhagavat-pādukābhyāṁ ॥

Prāṇa Pratiṣṭha

Riṣi-nyāsa

अस्य श्री प्राण प्रतिष्ठ महा मन्त्रस्य ।	asya śrī prāṇa pratiṣṭha mahā mantrasya ।
ब्रह्म-विष्णु महेश्वरा ऋष्यः ।	brahma-viṣṇu maheśvarā ṛṣyaḥ ।
ऋग्-यजुस्-साम अथर्वाणि छन्दांसि ।	ṛg-yajuḥ sāma atharvāṇi chandāṁsi ।
सकल् सृष्टि-स्थिति-संहार कारिणी प्राण शक्तिः परा देव्ता ।	sakal sṛṣṭi-sthiti-saṁhāra kāriṇī prāṇa śaktiḥ parā devtā ।
आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् ।	āṁ bījam । hrīṁ śaktiḥ । kroṁ kīlakam ।

Kara-nyāsa

ॐ अङ्गुष्ठाभ्यां नमः	oṁ aṅguṣṭhābhyāṁ namaḥ ।
ह्रीं तर्जनीभ्यां नमः ।	hrīṁ tarjanībhyāṁ namaḥ ।
क्रों मध्यमाभ्यां नमः ।	kroṁ madhyamābhyāṁ namaḥ ।
आं अनामिकाभ्यां नमः ।	āṁ anāmikābhyāṁ namaḥ ।
क्रों कर-तल-कर-पृष्ठाभ्यां नमः ।	kroṁ kara-tala-kara-pṛṣṭhābhyāṁ namaḥ ।

Aṅga-nyāsa

आं हृदयाय नमः	āṁ hṛdayāya namaḥ
ह्रीं शिरसे स्वाहा ।	hrīṁ śirase svāhā ।
क्रों शिखायै वषट् ।	kroṁ śikhāyai vaṣaṭ ।
आं कवचाय हुं ।	āṁ kavacāya huṁ ।
ह्रीं नेत्र-त्रयाय वौषट् ।	hrīṁ netra-trayāya vauṣaṭ ।
क्रों अस्त्राय फट् ।	kroṁ astrāya phaṭ ।
ॐ भूर्भुवस्सुवः इति दिग्-बन्धः	oṁ bhūr-bhuvaḥ suvaḥ iti dig-bandhaḥ

Prāṇa Śakti Dhyānam

रक्ताम् बोधिस्थपोतोल्लस दरुण सरोजाधि रूढा कराब्जैः
पाशं कोदण्डम् इक्षूद्भवम् अलिगुणम् अप्यङ्कुशं पञ्चबाणान् ।
बिभ्राणा सृक्-कपाल त्रि-नयन लसिता पीनवक्षोरुहाढ्याम्
देवी बालार्क वर्णा भवतु सुख-करि प्राण-शक्ति परा नः ॥
raktām bodhisthapotollasa daruṇa sarojādhi rūḍhā karābjaiḥ
pāśaṁ kodaṇḍam ikṣūdbhavam aliguṇam apyaṅkuśaṁ pañcabāṇān ।
bibhrāṇā sṛk-kapāla tri-nayana lasitā pīnavakṣoruhāḍhyām
devī bālārka varṇā bhavatu sukha-kari prāṇa-śakti parā naḥ ॥

"May the supreme vital energy (prāṇa-śakti) who bestows happiness be with us, The goddess with a reddish hue, resembling the rising sun, Seated on a blooming young lotus, Holding in her lotus-like hands a noose, a bow of sugarcane, a cluster of arrows made of flowers, A goad, and five arrows, Radiant with three eyes and adorned with large, firm breasts, Carrying a skull cup and a trident, And who is endowed with the complexion of the early morning sun."

पद्म-प्रिये पद्मिनि पद्म-हस्ते पद्मालये पद्म-दलायताक्षि ।
विश्व-प्रिये विष्णु मनोनुकूले त्वत् पाद पद्मम् मयि सन्निधत्स्व ॥
padma-priye padmini padma-haste padmālaye padma-dalāyatākṣi ।
viśva-priye viṣṇu manonukūle tvat pāda padmam mayi sannidhatsva ॥

"O Beloved of the Lotus, O Goddess who resides in the Lotus, O Lotus-Handed One, O Dweller in the Lotus, O Lotus-Eyed One with eyes like lotus petals, Beloved of the Universe, Favorable to the Mind of Vishnu, May your lotus feet be established in me."

आं ह्रीं क्रों क्रों ह्रीं आं । यं रं लं वं शं षं सं हों । हंसः सोहं सोहं हंसः ।

āṁ hrīṁ kroṁ kroṁ hrīṁ āṁ । yaṁ raṁ laṁ vaṁ śaṁ ṣaṁ saṁ hoṁ । haṁsaḥ sohaṁ sohaṁ haṁsaḥ ।

अस्यां मूर्तौ जीवस्-तिष्ठतु । अस्यां मूर्तौ सर्वेन्द्रियाणि वाङ्-मनस्-त्वक्-चक्षुः-श्रोत्र-जिह्वा-घ्राण-वाक्-पाणि-पाय-पायुस्थाख्यानि प्राणापान व्यानोदान समानाश्-चागत्य सुखम् चिरं तिष्ठन्तु स्वाहा ॥

asyāṁ mūrtau jīvas-tiṣṭhatu । asyāṁ mūrtau sarvendriyāṇi vāṅ-manas-tvak-cakṣuḥ-śrotra-jihvā-ghrāṇa-vāk-pāṇi-pāya-pāyusthākhyāni prāṇāpāna vyānodāna samānāś-cāgatya sukham ciraṁ tiṣṭhantu svāhā ॥

असुनीते पुनर् अस्मासु चक्षुः पुनः प्राणम् इह नो धेहि भोगम् ।
ज्योक् पश्येम सूर्यम् उच्चरन्तम् अनुमते मृलया नः स्वस्ति ॥
asunīte punar asmāsu cakṣuḥ punaḥ prāṇam iha no dhehi bhogam ।
jyok paśyema sūryam uccarantam anumate mṛlayā naḥ svasti ॥

O life-giving one, restore our sight once again, restore our breath here for us and grant us enjoyment. May we see the rising sun for a long time. O gracious one, bless us with well-being.

(for the 15 saṁskāras chant oṁ 15 times)

❖ *Touch the whole bera with the darbha-muṣṭi.*

ॐ ह्रां ह्रीं क्रौं हंसः । oṁ hrāṁ hrīṁ krauṁ haṁsaḥ ।
अस्य श्रीमन् नारायणस्य महा लक्ष्म्याश्च इह जीव इह स्थितः सुखेन चिरं तिष्ठन्तु स्वाहा ॥
asya śrīman nārāyaṇasya mahā lakṣmyāśca iha jīva iha sthitaḥ sukhena ciraṁ tiṣṭhantu svāhā ॥
heart

ॐ आं ह्रीं क्रौं हंसः । oṁ āṁ hrīṁ krauṁ haṁsaḥ ।
अस्य श्रीमन् नारायणस्य महा लक्ष्म्याश्च सर्वेन्द्रियाणि इहागत्य सुखेन चिरं तिष्ठन्तु स्वाहा ॥
asya śrīman nārāyaṇasya mahā lakṣmyāśca sarvendriyāṇi ihāgatya sukhena ciraṁ tiṣṭhantu svāhā ॥ all organs

ॐ ह्रीं क्रौं हंसः । oṁ hrīṁ krauṁ haṁsaḥ ।
अस्य श्रीमन् नारायणस्य महा लक्ष्म्याश्च वाङ् मनश्-चक्षु श्रोत्र प्राणा इहागत्य सुखेन चिरं तिष्ठन्तु स्वाहा ॥
asya śrīman nārāyaṇasya mahā lakṣmyāśca vāṅ manaś-cakṣu śrotra prāṇā ihāgatya sukhena ciraṁ tiṣṭhantu svāhā ॥ head

ॐ आं ह्रीं क्रौं हंसः । oṁ āṁ hrīṁ krauṁ haṁsaḥ ।
अस्य श्रीमन् नारायणस्य महा लक्ष्म्याश्च वाग् इहागत्य सुखेन चिरं तिष्ठन्तु स्वाहा ॥
asya śrīman nārāyaṇasya mahā lakṣmyāśca vāg ihāgatya sukhena ciraṁ tiṣṭhantu svāhā ॥ face

Pañcopaniṣad Nyāsam

ॐ षौं नमः पराय परमेष्ठ्यात्मने नमः ॥
oṁ ṣauṁ namaḥ parāya parameṣṭhyātmane namaḥ ॥ head
ॐ यां नमः पराय पुरुषात्मने नमः ॥
oṁ yāṁ namaḥ parāya puruṣātmane namaḥ ॥ nose
ॐ रां नमः पराय विश्वात्मने नमः ॥
oṁ rāṁ namaḥ parāya viśvātmane namaḥ ॥ heart
ॐ वां नमः पराय निवृत्यात्मने नमः ॥
oṁ vāṁ namaḥ parāya nivṛtyātmane namaḥ ॥ genitals
ॐ लां नमः पराय सर्वात्मने नमः ॥
oṁ lāṁ namaḥ parāya sarvātmane namaḥ ॥ feet
ॐ नमो भगवते वासुदेवाय ॥
oṁ namo bhagavate vāsudevāya ॥ The whole body

ब्रह्माद्याः सकला देवा यन्न स्मर्तुम् अपीश्वराः । स एष भगवान् अद्य मम प्रत्यक्षतां गतः ॥ १ ॥
brahmādyāḥ sakalā devā yanna smartum apīśvarāḥ ।
sa eṣa bhagavān adya mama pratyakṣatāṁ gataḥ ॥ 1 ॥

"All the gods, starting with Brahma, are unable to even conceive of Him, That very Lord has today become visible to me."

स्वागतं भगवन् अद्य मां तारयितुं आगतः । धन्योऽस्म्यनुगृहीतोऽस्मि कृतार्थोऽस्मि कृपानिधे ॥ २ ॥

svāgataṁ bhagavan adya māṁ tārayituṁ āgataḥ ।
dhanyo'smyanugṛhīto'smi kṛtārtho'smi kṛpānidhe ॥ 2 ॥

"Welcome, O Lord, you have come today to deliver me. I am blessed, favored, fulfilled, O treasure house of mercy."

आवाहयामि लक्ष्मीशं परमात्मानम् अव्ययम् । पञ्चोपनिषदात्मानं दिव्य मङ्गल विग्रहम् ॥ ३ ॥
āvāhayāmi lakṣmīśaṁ paramātmānam avyayam ।
pañcopaniṣadātmānaṁ divya maṅgala vigraham ॥ 3 ॥

"I invoke the Lord of Lakshmi, the imperishable Supreme Self, The one embodied by the five Upanishads, with a divine auspicious form."

आतिष्ठताम् इमां मूर्तिं मदनुग्रह काम्यया । श्रिया सार्धं जगन्नाथो दिव्यो नारायण प्रभुः ॥ ४ ॥
ātiṣṭhatām imāṁ mūrtiṁ madanugraha kāmyayā ।
śriyā sārdhaṁ jagannātho divyo nārāyaṇa prabhuḥ ॥ 4 ॥

"May the divine Lord Narayana, the Lord of the universe, along with Shri, Take His place in this image, desiring to bestow grace upon me."

ॐ ॐ ॐ परम धामा-वस्थित मद् अनुग्रह काम्ययोध्यत् आवतार इहा भीमत सिद्धिद मन्त्र शरीर् ॐ नमो नमः ॥
oṁ oṁ oṁ parama dhāmā-vasthita mad anugraha kāmyayodhyat āvatāra ihā bhīmata siddhida mantra śarīr oṁ namo namaḥ ॥

आवाहितो भव । स्थापितो भव । सन्निधो भव । सन्निरुद्धो भव । सन्निहितो भव । अवकुण्टिथो भव । सुप्रीतो भव । सुप्रसन्नो भव । सुमुखो भव । वरदो भव । प्रसीद प्रसीद ॥

āvāhito bhava । sthāpito bhava । sannidho bhava । sanniruddho bhava । sannihito bhava । avakuṇṭitho bhava । suprīto bhava । suprasanno bhava । sumukho bhava । varado bhava । prasīda prasīda ॥

- ❖ *Show kirīṭa, śrīvatsa, kaustubha, vanamālā, śaṅkha, cakra, gadā, cāpa, khaḍga, musala, ananta, garuḍa & viṣvaksena mudras.*
- ❖ *Offer obeisance to the three devis.*

ॐ श्रीं श्रियै नमः	oṁ śrīṁ śriyai namaḥ	(right)
ॐ भूं भूम्यै नमः	oṁ bhūṁ bhūmyai namaḥ	(left)
ॐ नीं नीलायै नमः	oṁ nīṁ nīlāyai namaḥ	(behind)

- ❖ *Offer worship to the ornaments and entourage of the Lord;*

ॐ किरीटाय मकुटाधिपतये नमः । किरीटमालायै आपीढात्मने ० । दक्षिण कुण्डलाय मकरात्मने ० । वाम कुण्डलाय मकरात्मने ० । कण्टिकाभरणाय ० । श्रीमत् तुलस्यै ० । हाराय सर्वाभरणाधिपतये ० । काञ्ची-गुणोज्ज्वलाय दिव्य पीताम्बराय ० । सर्वेभ्यो भगवद् भूषणेभ्यो नमः ॥

oṁ kirīṭāya makuṭādhipataye namaḥ । kirīṭamālāyai āpīḍhātmane o । dakṣiṇa kuṇḍalāya makarātmane o । vāma kuṇḍalāya makarātmane o । kaṇṭikābharaṇāya o । śrīmat tulasyai o । hārāya sarvābharaṇādhipataye o । kāñcī-guṇojjvalāya divya pītāmbarāya o । sarvebhyo bhagavad bhūṣaṇebhyo namaḥ ॥

ॐ सुदर्शनाय हेतिराजाय नमः । पाञ्चजन्याय शङ्खाधिपतये ० । कौमोदक्यै गदाधिपतये ० । नन्दकाय ० । शार्ङ्गाय चापाधिपतये ० । पद्मायै नमः ॥

oṁ sudarśanāya hetirājāya namaḥ । pāñcajanyāya śaṅkhādhipataye o । kaumodakyai gadādhipataye o । nandakāya o । śārṅgāya cāpādhipataye o । padmāyai o ॥

ॐ सर्वेभ्यो भगवत परिचारकेभ्यो नमः । अनन्ताय नागराजाय ० । वारुण्यै ० । काञ्च्यै नमः ॥

oṁ sarvebhyo bhagavata paricārakebhyo namaḥ । anantāya nāgarājāya o । vāruṇyai o । kāñcyai o ॥

ॐ सर्वेभ्यो भगवत परि-जनेभ्यो नमः । भगवत पादुकाभ्यां ० । सर्वेभ्यो भगवत परिच्छदेभ्यो नमः ॥

oṁ sarvebhyo bhagavata pari-janebhyo namaḥ । bhagavata pādukābhyāṁ o । sarvebhyo bhagavata paricchadebhyo namaḥ ॥

ॐ वैनतेयाय नमः । ॐ रुद्रायै नमः । ॐ सुकीर्त्यै नमः ॥

oṁ vainateyāya namaḥ । oṁ rudrāyai namaḥ । oṁ sukīrtyai namaḥ ॥

ॐ विष्वक्सेनाय नमः । सूत्रवत्यै ० । गं गजाननाय ० । जं जयत्सेनाय ० । ॐ हं हरिवक्त्राय ० । ॐ कं काल-प्रकृति-संज्ञाय ० । सर्वेभ्यो विष्वक्सेन परिजनेभ्यो नमः ।

oṁ viṣvaksenāya namaḥ । sūtravatyai o । gaṁ gajānanāya o । jaṁ jayatsenāya o । oṁ haṁ harivaktrāya o । oṁ kaṁ kāla-prakṛti-saṁjñāya o । sarvebhyo viṣvaksena parijanebhyo o ।

ॐ चण्डाय द्वार-पालाय नमः । प्रचण्डाय द्वार-पालाय ० । भद्राय द्वार-पालाय ० । सुभद्राय द्वार-पालाय ० । जयाय द्वार-पालाय ० । विजयाय द्वार-पालाय ० । धात्रे द्वार-पालाय ० । विधात्रे द्वार-पालाय नमः ॥

oṁ caṇḍāya dvāra-pālāya namaḥ । pracaṇḍāya dvāra-pālāya o । bhadrāya dvāra-pālāya o । subhadrāya dvāra-pālāya o । jayāya dvāra-pālāya o । vijayāya dvāra-pālāya o । dhātre dvāra-pālāya o । vidhātre dvāra-pālāya o ॥

कुमुदाय गणाधिपतये सवाहन परिवार प्रहरणाय नमः ।
kumudāya gaṇādhipataye savāhana parivāra praharaṇāya namaḥ ।
कुमुदाक्षाय गणाधिपतये सवाहन परिवार प्रहरणाय नमः ।
kumudākṣāya gaṇādhipataye savāhana parivāra praharaṇāya namaḥ ।
पुण्डरीकाय गणाधिपतये सवाहन परिवार प्रहरणाय नमः ।
puṇḍarīkāya gaṇādhipataye savāhana parivāra praharaṇāya namaḥ ।
वामनाय गणाधिपतये सवाहन परिवार प्रहरणाय नमः ।
vāmanāya gaṇādhipataye savāhana parivāra praharaṇāya namaḥ ।
शङ्कुकर्णाय गणाधिपतये सवाहन परिवार प्रहरणाय नमः ।
śaṅkukarṇāya gaṇādhipataye savāhana parivāra praharaṇāya namaḥ ।
सर्वनेत्राय गणाधिपतये सवाहन परिवार प्रहरणाय नमः ।
sarvanetrāya gaṇādhipataye savāhana parivāra praharaṇāya namaḥ ।
सुमुखाय गणाधिपतये सवाहन परिवार प्रहरणाय नमः ।
sumukhāya gaṇādhipataye savāhana parivāra praharaṇāya namaḥ ।
सुप्रतिष्ठाय गणाधिपतये सवाहन परिवार प्रहरणाय नमः ।
supratiṣṭhāya gaṇādhipataye savāhana parivāra praharaṇāya namaḥ ।

ॐ नित्येभ्यो नमः । मुक्तेभ्यो । समस्त परिवाराय श्रीमते नारायणाय नमः ॥
oṁ nityebhyo namaḥ । muktebhyo । samasta parivārāya śrīmate nārāyaṇāya namaḥ ॥

❖ *Offer water -*

ॐ नमो नारायणाय अर्घ्यं समर्पयामि ।
oṁ namo nārāyaṇāya arghyaṁ samarpayāmi । (once)
ॐ नमो नारायणाय पाद्यं समर्पयामि ।
oṁ namo nārāyaṇāya pādyaṁ samarpayāmi । (twice)
ॐ नमो नारायणाय आचमनियं समर्पयामि ।
oṁ namo nārāyaṇāya ācamaniyaṁ samarpayāmi । (thrice).

❖ *Wipe the Lord's face and right hand with the plota-vastra.*

2. SNĀNĀSANAM

ॐ स्नानासनाय नमः oṁ snānāsanāya namaḥ

स्फुटि कृतं मया देव स्नानासनं इदं महत् । आसादयासु स्नानार्थं लोक अनुग्रह काम्यया ॥
sphuṭi kṛtaṁ mayā deva snānāsanaṁ idaṁ mahat ।
āsādayāsu snānārthaṁ loka anugraha kāmyayā ॥

O deity, I have prepared this great bathing seat. Please take your place here for the purpose of bathing, out of a desire to bestow grace upon the world.

- *Take flower and tulsi & offer at feet of the Lord -*

ॐ नमो नारायणाय - स्नानासनं समर्पयामि ।
oṁ namo nārāyaṇāya - snānāsanaṁ samarpayāmi ।

- *Offer water -*

ॐ नमो नारायणाय पाद्यं समर्पयामि ।
oṁ namo nārāyaṇāya pādyaṁ samarpayāmi ।
ॐ नमो नारायणाय आचमनियं समर्पयामि ।
oṁ namo nārāyaṇāya ācamaniyaṁ samarpayāmi ।
ॐ नमो नारायणाय स्नानम् समर्पयामि ॥
nārāyaṇāya snānam samarpayāmi ॥
ॐ नमो नारायणाय स्नानानन्तरं पुनराचमनियं समर्पयामि ॥
oṁ namo nārāyaṇāya snānānantaram punarācamaniyaṁ samarpayāmi ।

- *Dry the Lord with the plota-vastra*
- *Empty the pañca-pātra into the phela.*
- *Repeat the pātra-kalpanam.*

3. ALAṄKĀRĀSANAM

ॐ अलङ्कारासनाय नमः oṁ alaṅkārāsanāya namaḥ

देव देव जगन्-नाथ भूषासनं इदं महत् । आकल्प धारणार्थाय अलङ्कुरुष्व जगत्पते ॥
deva deva jagan-nātha bhūṣāsanaṁ idaṁ mahat ।
ākalpa dhāraṇārthāya alaṅkuruṣva jagatpate ॥

O Lord of the Universe, this great throne is prepared for you. Please adorn it with your presence for the purpose of sustaining the world, O Lord of all.

- *Offer flower and tulsi -*

ॐ नमो नारायणाय अलङ्कारासनं समर्पयामि ।
oṁ namo nārāyaṇāya alaṅkārāsanaṁ samarpayāmi ।

- *Offer water -*

ॐ नमो नारायणाय अर्घ्यं समर्पयामि ।
oṁ namo nārāyaṇāya arghyaṁ samarpayāmi ।
ॐ नमो नारायणाय पाद्यं समर्पयामि ।
oṁ namo nārāyaṇāya pādyaṁ samarpayāmi ।
ॐ नमो नारायणाय आचमनियं समर्पयामि ।
oṁ namo nārāyaṇāya ācamaniyaṁ samarpayāmi ।

- *Dress and decorate the Lord, applying ūrdhva-puṇḍra to the forehead.*

ॐ नमो नारायणाय वस्त्र अर्थं पुष्पं समर्पयामि ।

oṁ namo nārāyaṇāya vastra arthaṁ puṣpaṁ samarpayāmi ।
ॐ नमो नारायणाय उत्तरीय अर्थं पुष्पं समर्पयामि ।
oṁ namo nārāyaṇāya uttarīya arthaṁ puṣpaṁ samarpayāmi ।
ॐ नमो नारायणाय उपवीत अर्थं पुष्पं समर्पयामि ।
oṁ namo nārāyaṇāya upavīta arthaṁ puṣpaṁ samarpayāmi ।
ॐ नमो नारायणाय आभरणार्थं पुष्पं समर्पयामि ।
oṁ namo nārāyaṇāya ābharaṇārthaṁ puṣpaṁ samarpayāmi ।

❖ *Offer sandal paste -*

परमानन्द सौरभ्य परिपूर्ण दिग्-अन्तरं । गृहाण परमं गन्धं कृपया परमेश्वर ॥
paramānanda saurabhya paripūrṇa dig-antaraṁ ।
gṛhāṇa paramaṁ gandhaṁ kṛpayā parameśvara ॥

O Supreme Lord, please accept this ultimate fragrance, which fills the entire space with supreme bliss.

ॐ नमो नारायणाय गन्धं धारयामि ।
oṁ namo nārāyaṇāya gandhaṁ dhārayāmi ।

❖ *Offer Kumkum -*

गन्धस्योपरि-कुम्कुमं समर्पयामि
gandhasyopari-kumkumaṁ samarpayāmi

❖ *Offer flowers -*

तुरीय गुण सम्पन्नं नाना गुण मनोहरम् । आनन्द सौरभं पुष्पं गृह्यताम् इदं उत्तमम् ॥
turīya guṇa sampannaṁ nānā guṇa manoharam ।
ānanda saurabhaṁ puṣpaṁ gṛhyatām idaṁ uttamam ॥

May this best of all flowers, endowed with the qualities of the fourth state and filled with delightful fragrances, be accepted by you.

Puṣpa Arcana

Viṣṇu aṣṭhottara śata-nāmavalli

ॐ विष्णवे नमः । लक्ष्मी-पतये । गोपालाय । वैकुन्ठाय । गरुड-ध्वजाय । पर-ब्रह्मणे । जगन्-नाथाय । वासुदेवाय । त्रि-विक्रमाय । दैत्यान्तकाय ॥ १० ॥

oṁ viṣṇave namaḥ । lakṣmī-pataye । gopālāya । vaikunṭhāya । garuḍa-dhvajāya । para-brahmaṇe । jagan-nāthāya । vāsudevāya । tri-vikramāya । daityāntakāya ॥ 10 ॥

मधु-रिपवे । ताक्ष्यर्-वाहाय । सनातनाय । नारायणाय । पद्म-नाभाय । हृषिकेशाय । सुधा-प्रदाय । माधवाय । पुण्डरिकाक्षाय । स्थिति-कर्त्रे ॥ २० ॥

madhu-ripave । tārkṣya-vāhāya । sanātanāya । nārāyaṇāya । padma-nābhāya । hṛṣikeśāya । sudhā-pradāya । mādhavāya । puṇḍarikākṣāya । sthiti-kartre ॥ 20 ॥

परात्पराय । वनमालिने । यज्ञ-रूपाय । चक्र-पाणये । गदा-धराय । उपेन्द्राय । केशवाय । हम्साय । समुद्र-मथनाय । हरये ॥ ३० ॥

parātparāya । vanamāline । yajña-rūpāya । cakra-pāṇaye । gadā-dharāya । upendrāya । keśavāya । hamsāya । samudra-mathanāya । haraye ॥ 30 ॥

गोविन्दाय । ब्रह्म-जनकाय । कैटभासुर- मर्दनाय । श्रीधराय । काम-जनकाय । शेष-शायिने । चतुर्-भुजाय । पाञ्चजन्य-धराय । श्रीमते । शार्ङ्ग-पाणये ॥ ४० ॥

govindāya । brahma-janakāya । kaiṭabhāsura- mardanāya । śrīdharāya । kāma-janakāya । śeṣa-śāyine । catur-bhujāya । pāñcajanya-dharāya । śrīmate । śārṅga-pāṇaye ॥ 40 ॥

जनार्दनाय । पिताम्बर-धराय । देवाय । सूर्य-चन्द्र-विलोचनाय । मत्स्य-रूपाय । कूर्म-रूपाय । क्रोढ-रूपाय । नृकेशरिनि । वामनाय । भार्गवाय ॥ ५० ॥

janārdanāya | pitāmbara-dharāya | devāya | sūrya-candra-vilocanāya | matsya-rūpāya | kūrma-rūpāya | kroḍha-rūpāya | nṛkeśarini | vāmanāya | bhārgavāya ॥ 50 ॥

रामाय । हलिने । कृष्णाय । हयाननाय । विश्वम्बराय । सिम्सुमाराय । श्रीधराय । कपिलाय । ध्रुवाय । दत्तात्रेयाय ॥ ६० ॥

rāmāya | haline | kṛṣṇāya | hayānanāya | viśvambarāya | simsumārāya | śrīdharāya | kapilāya | dhruvāya | dattātreyāya ॥ 60 ॥

अच्युताय । अनन्ताय । मुकुन्दाय । दधि-वामनाय । धन्वन्तरये । श्री-निवासाय । प्रद्युम्नाय । पुरुषोत्तमाय । श्रीवत्स-कौस्तुभोरस्काय । मुरारातये ॥ ७० ॥

च-काराय हेम-वर्णाय मेहनात्मने — चं नम ॥ ग्रोइन्
ca-kārāya hema-varṇāya mehanātmane — caṁ nama ॥ *Groin*
ङ-काराय पित-वर्णाय पृथिवीतत्वाय चतुरश्राय — ङं नम
ṅa-kārāya pita-varṇāya pṛthivītatvāya caturaśrāya — ṅaṁ nama ॥ *From Feet To Knees*
घ-काराय स्फटिक-वर्णाय जलात्मने अर्धचन्द्राकाराय — घं नम ॥
gha-kārāya sphaṭika-varṇāya jalātmane ardhacandrākārāya — ghaṁ nama ॥ *Knees To Groin*
ग-काराय लोहितवर्णाय तेज आत्मने त्रिकोणाय — गं नम ॥
ga-kārāya lohitavarṇāya teja ātmane trikoṇāya — gaṁ nama ॥ *Groin To Navel*
ख-काराय वेदिकाकाराय धूम्रवर्णाय वाय्वात्मने — खं नम ॥
kha-kārāya vedikākārāya dhūmravarṇāya vāyvātmane — khaṁ nama ॥ *Navel To Nose*
क-काराय पृथ्व्यात्मने — कं नम ॥
ka-kārāya pṛthvyātmane — kaṁ nama ॥ *Nose To Top Of Head*

10. Daśa-vāyunāṁ homaḥ

ॐ प्राणाय स्वाहा — प्राणय इदं न मम
oṁ prāṇāya svāhā — prāṇaya idaṁ na mama *Heart*
ॐ अपानाय स्वाहा — अपानाय इदं न मम
oṁ apānāya svāhā — apānāya idaṁ na mama *Posterior*
ॐ समानाय स्वाहा — समानाय इदं न मम
oṁ samānāya svāhā — samānāya idaṁ na mama *Navel*
ॐ उदानाय स्वाहा — उदानाय इदं न मम

oṁ udānāya svāhā — udānāya idaṁ na mama *Throat*

ॐ व्यानाय स्वाहा — व्यानाय इदं न मम

oṁ vyānāya svāhā — vyānāya idaṁ na mama *All Limbs*

ॐ नागाय स्वाहा — नागाय इदं न मम

oṁ nāgāya svāhā — nāgāya idaṁ na mama *Heart*

ॐ कूर्माय स्वाहा — कूर्माय इदं न मम

oṁ kūrmāya svāhā — kūrmāya idaṁ na mama *Posterior*

ॐ कृकलाय स्वाहा — कृकलाय इदं न मम

oṁ kṛkalāya svāhā — kṛkalāya idaṁ na mama *Throat*

ॐ केसराय स्वाहा — केसराय इदं न मम

oṁ kesarāya svāhā — kesarāya idaṁ na mama *Navel*

ॐ धनञ्जयाय स्वाहा — ॐ धनञ्जयाय इदं न मम

oṁ dhanañjayāya svāhā — oṁ dhanañjayāya idaṁ na mama *All limbs*

10. Śānti homa

11. Prāṇa-pratiṣṭha mantra –

हे हंस हे जीव भगवच्चरणाम्बुजात् आगच्छ आगच्छ

he haṁsa he jīva bhagavac-caraṇāmbujāt āgaccha āgaccha x 7

visualize the bhakta descending from the lord's feet into the invocatory vessel and display the āvāhana mudras.

12. Offer 16 upacāras
13. naivedyam
14. nirājanam & puṣpāñjali



HANUMAT PRATIṢṬHA VIDHIḤ

1. anujñām

ॐ अपराजित पिङ्गाक्ष नमस्ते देव-पूजित । भवतः प्रक्षणम् कर्तुं अनुज्ञां देहि मे प्रभो ॥
oṁ aparājita piṅgākṣa namaste deva-pūjita |
bhavataḥ prakṣaṇam kartuṁ anujñāṁ dehi me prabho ||

O Unconquered One, with tawny eyes, salutations to you, who are worshipped by the gods. Grant me, O Lord, the permission to perform your worship.

2. puṇyāha vācanam
3. mṛtsaṅgrahaṇa
4. aṅkūrarpaṇam
5. vāstu śāntiḥ
6. rakṣā bandhana
7. pañca-gavya
8. paryagnikaraṇam
9. dhānyādhivāsanam
10. jalādhivāsanam
11. chāyādhivāsanam
12. snapanam
13. nayanonmilanam
14. śayanādhivāsam
15. kūṣmāṇḍa gaṇa homam
16. āṣṭha-bandhanam



Yāgaśālā kriyāni

East (red flags) —

aśvattha torane	ॐ ऋग्-रूपाय नमः oṁ ṛg-rūpāya namaḥ
dhvaje	ॐ अनलाय नमः, ॐ नीलाय नमः oṁ analāya namaḥ, oṁ nīlāya namaḥ
kumbhayoḥ	ॐ कुण्डोधराय नमः, ॐ बलवन्ताय नमः— oṁ kuṇḍodharāya namaḥ, oṁ balavantāya namaḥ

South (yellow flags) —

audumbara torane	ॐ यजुर्-वेदाय नमः oṁ Yajur-vedāya namaḥ
dhvaje	ॐ कुमुदाय नमः, ॐ गवये नमः oṁ kumudāya namaḥ, oṁ gavaye namaḥ
kumbhayoḥ	ॐ बिद्धिमन्ताय नमः, ॐ नीतिमन्ताय नमः oṁ biddhimantāya namaḥ, oṁ nītimantāya namaḥ

West (black flags)—

nyagrodha torane	ॐ साम-वेदाय नमः oṁ sāma-vedāya namaḥ
dhvaje	ॐ शरभाय नमः, ॐ ताराय नमः oṁ śarabhāya namaḥ, oṁ tārāya namaḥ
kumbhayoḥ	ॐ दैर्यवन्ताय नमः, ॐ स्थैर्यवन्ताय नमः oṁ dairyavantāya namaḥ, oṁ sthairyavantāya namaḥ

North (white flags)—

plakṣa torane	ॐ अथर्व-वेदाय नमः oṁ atharva-vedāya namaḥ
dhvaje	ॐ पवनाय नमः, ॐ गवये नमः oṁ pavanāya namaḥ, oṁ gavaye namaḥ
kumbhayoḥ	ॐ शौर्यवन्ताय नमः, ॐ पराक्रमवन्ताय नमः oṁ śauryavantāya namaḥ, oṁ parākramavantāya namaḥ

Invocation of Mahākumbha

- *Place a layer of grain on the vedika*
- *prepare the threaded kumbhas, fill with scented water,*
- *In the kumbhas worship the pīṭha śaktis from ādhāra to padma, offer dhūpa and dīpa.*

अस्मिन् आवाहन पात्रे आगच्छऽगच्छ ॥ asmin āvāhana pātre āgaccha'gaccha ॥
आवाहन पात्रात् अस्मिन् कुम्भे आवाहयामि ॥ āvāhana pātrāt asmin kumbhe āvāhayāmi ॥

- show 6 āvāhana mudras

ॐ हां oṁ hāṁ etc. ṣaḍaṅganyāsa

- *offer arghya etc.*
- *In the upa-kumbhas invoke the aṣṭa-dikpālakas*
- *In the karake invoke oṁ bhīmasenāya*

HOMA VIDHI

- *Prepare the agni according to the procedural rites.*
- *Offer ghee from ādhāra to padma.*
- *In the fire invoke hanuman with the mūla mantra*
- *Offer all the 16 upacāras with ghee.*
- *With samit, caru and ājyam offer either 108, or 28 or 8 oblations with the following:—*

ॐ नमो भगवत हनुमते पीताम्बर धराय कर्ण कुण्डलाऽलङ्कृताय किरीट तुलसी वन-माला विभूषिताय, कनक यज्ञोपवीताय, कटिसूत्र विराजिताय, श्री रामचन्द्राऽभिलाषाय, लङ्का-पुरी दाहन कारणाय, दानव कुल-गिरि वज्र चण्डाय अक्षय-कुमार संहारकाय, ॐ यं इं घ्रों ॐ नमो भगवत राम-दूताय हनुमते हुं फट् स्वाहा ॥

oṁ namo bhagavata hanumate pītāmbara dharāya karṇa kuṇḍalā'laṅkṛtāya kirīṭa tulasī vana-mālā vibhūṣitāya, kanaka yajñopavītāya, kaṭisūtra virājitāya, śrī rāmacandrā'bhilāṣāya, laṅkā-purī dāhana kāraṇāya, dānava kula-giri vajra caṇḍāya akṣaya-kumāra saṁhārakāya, oṁ yaṁ iṁ ghroṁ oṁ namo bhagavata rāma-dūtāya hanumate huṁ phaṭ svāhā ॥

ॐ आञ्जनेयाय विद्महे, वायु पुत्राय धीमहि, तन्नो हनुमत् प्रचोदयात् ॥
oṁ āñjaneyāya vidmahe, vāyu putrāya dhīmahi, tanno hanumat pracodayāt ॥
ॐ हरि मर्कट मर्कटाय स्वाहा ।
oṁ hari markaṭa markaṭāya svāhā ।
ॐ मर्कटेष महोत्साहो सर्व क्षुद्र निबर्हण । शत्रून् संहर मां रक्ष श्रियम्दापय देहि मे स्वाहा ।
oṁ markaṭeṣa mahotsāho sarva kṣudra nibarhaṇa । śatrūn saṁhara māṁ rakṣa śriyamdāpaya dehi me svāhā ।

- *puruṣa sūktena caru*
- *sviṣṭakṛt*
- *śānti mantra*
- *pañcopaniṣat mantra*

- *pūrṇāhuti*

Nyāsa Homam

- *do nyāsa with sampāt ājyam*

Saṅkalpaḥ - अद्य पूर्वोक्त एवं गुण विशेषण विशिष्ठायां अस्यां श्री हनुमत् प्रतिष्ठा काले बिंबस्य अप्राकृतत्व सिद्ध्यर्थं तत्त्व न्यास होमं करिष्ये । तद् अनन्तरं अङ्ग मन्त्रेण हवनञ्च करिष्ये ॥

adya pūrvokta evaṁ guṇa viśeṣaṇa viśiṣṭhāyāṁ asyāṁ śrī hanumat pratiṣṭhā kāle biṁbasya aprākṛtatva siddhyarthaṁ tattva nyāsa homaṁ kariṣye । tad anantaraṁ aṅga mantreṇa havanañca kariṣye ॥

On this day, at the time of Lord Hanuman's installation, with the aforementioned qualities and attributes, I shall perform the Tattva Nyasa Homa for establishing the transcendental nature of the icon. Thereafter, I shall perform the oblation with the Aṅga Mantra.

Aṅga mantra homa vidhiḥ

- *Using the following mantras, oblate with svāhā and touch with namaḥ taking sampāt ājyam*

ॐ हणुमते नमः । पादौ पूजयामि । oṁ haṇumate namaḥ । pādau pūjayāmi ।
ॐ सुग्रीव सचिवाय नमः । गुल्फौ पूजयामि । oṁ sugrīva sacivāya namaḥ । gulphau pūjayāmi ।
ॐ अङ्गद प्रियाय नमः । उरुं पूजयामि । oṁ aṅgada priyāya namaḥ । uruṁ pūjayāmi ।
ॐ अक्षोघ्नाय नमः । कटिं पूजयामि । oṁ akṣoghnāya namaḥ । kaṭiṁ pūjayāmi ।
ॐ लङ्का दहनाय नमः । वालम् पूजयामि । oṁ laṅkā dahanāya namaḥ । vālam pūjayāmi ।
ॐ राम मणिदाननाय नमः । नाभिं पूजयामि । oṁ rāma maṇidānanāya namaḥ । nābhiṁ pūjayāmi ।
ॐ सागरोल्लङ्घनाय नमः । मध्यमं पूजयामि । oṁ sāgarollaṅghanāya namaḥ । madhyamaṁ pūjayāmi ।
ॐ लङ्का मर्दनाय नमः । केशावलिं पूजयामि । oṁ laṅkā mardanāya namaḥ । keśāvaliṁ pūjayāmi ।
ॐ सञ्जीवनाहर्त्रे नमः । स्थनौ पूजयामि । oṁ sañjīvanāhartre namaḥ । sthanau pūjayāmi ।
ॐ सौमित्री प्राण धाय नमः । वक्षं पूजयामि । oṁ saumitrī prāṇa dhāya namaḥ । vakṣaṁ pūjayāmi ।
ॐ कुण्ठित दश कण्ठाय नमः । कण्ठं पूजयामि । oṁ kuṇṭhita daśa kaṇṭhāya namaḥ । kaṇṭhaṁ pūjayāmi ।
ॐ रामाभिषेक कारिणे नमः । हस्तौ पूजयामि । oṁ rāmābhiṣeka kāriṇe namaḥ । hastau pūjayāmi ।
ॐ मन्त्र रचित रामायणाय ०। वक्त्रं पूजयामि । oṁ mantra racita rāmāyaṇāya namaḥ । vaktraṁ pūjayāmi ।
ॐ प्रसन्न वदनाय नमः । वदनम् पूजयामि । oṁ prasanna vadanāya namaḥ । vadanam pūjayāmi ।
ॐ पिङ्ग-नेत्राय नमः । नेत्रौ पूजयामि । oṁ piṅga-netrāya namaḥ । netrau pūjayāmi ।
ॐ श्रुति पारगाय नमः । श्रोत्रे पूजयामि । oṁ śruti pāragāya namaḥ । śrotre pūjayāmi ।
ॐ ऊर्ध्व पुण्ड्र धारिणे नमः । कपोलं पूजयामि । oṁ ūrdhva puṇḍra dhāriṇe namaḥ । kapolaṁ pūjayāmi ।
ॐ मणिकण्ठ मालिने नमः । शिरः पूजयामि । oṁ maṇikaṇṭha māline namaḥ । śiraḥ pūjayāmi ।
ॐ सर्वाभिष्ट वरप्रदाय ०। सर्वाङ्गं ०। oṁ sarvābhiṣṭa varapradāya namaḥ । sarvāṅgaṁ pūjayāmi ।

- *Uttarāṅgam*
- *pūrṇāhuti*
- *Invocation from the māhākumbha to the bera*
- *In the auspicious hour take the mahākumbha and upa-kumbhas into the sanctum and place them upon heaps of rice.*
- *Do yoga-pīṭhārcana*
- *with the āvāhana pātra take water from the mahākumbha add tuḷasī leaf —*

ॐ कणकाचल सन्निभं द्विभुज कृतञ्जलिं मुक्ता धाम विभूषितं मेरु तटरं भावन मध्ये स्थित पारिजातवृक्ष मुले बद्धावासं सीताराम कैङ्कर्य सेवा तत् कथा श्रवणाऽनन्द समृद्ध पुल्कस मेघमान गात्रं हनूमन्तं ध्यात्व ।

oṁ kaṇakācala sannibhaṁ dvibhuja kṛtañjaliṁ muktā dhāma vibhūṣitaṁ meru taṭaraṁ bhāvana madhye sthita pārijātavṛkṣa mule baddhāvāsaṁ sītārāma kaiṅkarya sevā tat kathā śravaṇā'nanda samṛddha pulkasa meghamāna gātraṁ hanūmantaṁ dhyātva ॥

"Om, meditating upon Hanuman, whose complexion resembles a golden mountain, who stands with folded hands, adorned with a garland of pearls, residing at the base of the Parijata tree located on the slopes of Mount Meru, who is engaged in the service of Sita and Rama, whose body is thrilled with the joy of hearing and narrating their stories."

ॐ वानर पुङ्गवाय ॐ हनुमते नमः आगच्छऽगच्छ ।
oṁ vānara puṅgavāya oṁ hanumate namaḥ āgaccha'gaccha ॥

- *offer the water and tulsi on the head of the mūrti*
- *show the 6 invocatory mudras.*

पारिजात तरोमूलम् वासिनं वनवासिनं । पश्चिमाभि मुखम् बालं हनूमन्तं उपास्महे ॥
pārijāta taromūlam vāsinaṁ vanavāsinaṁ ।
paścimābhi mukham bālaṁ hanūmantaṁ upāsmahe ॥

We worship Hanuman, the youthful one residing at the root of the Parijata tree, dwelling in the forest, facing westward.

ॐ हां oṁ hāṁ - do śaḍaṅganyāsa

हनूमान् अञ्जनी सूनो राम पादब्ज षट्पद । वायु-पुत्र नमस्तेस्तु सान्निध्यं कुरु सर्वदा ॥
hanūmān añjanī sūno rāma pādabja ṣaṭpada ।
vāyu-putra namastestu sānnidhyaṁ kuru sarvadā ॥

O Hanuman, son of Anjani, bee at the lotus feet of Rama, son of the Wind God, I bow to you. Please be present with me always.

स्वामिन् सर्व जगन्नाथ यावच्चन्द्र दिवाकरौ तावत् त्वं भक्ति भावेन बिम्बेस्मिन् सन्निधिं कुरु ॥
svāmin sarva jagannātha yāvaccandra divākarau tāvat tvaṁ bhakti bhāvena bimbesmin sannidhiṁ kuru ॥

- *Do prāṇa pratiṣṭha*
- *Place the upakumbhas at the mūrti's feet.*
- *Recite hanumad bujaṅga stotra*

ॐ प्रपन्नानु रागं प्रभा काञ्जनाङ्गं, जगद् भीति शौर्यं तुषाराद्रि धैर्यं ।
तृणी भूत हेतिं रणोद्यद्धि भूतिं, भजे वायु पुत्रम् पवित्राप्त मित्रं ॥ १ ॥
oṁ prapannānu rāgaṁ prabhā kāñjanāṅgaṁ
jagad bhīti śauryaṁ tuṣārādri dhairyaṁ ।
tṛṇī bhūta hetiṁ raṇodyaddhi bhūtiṁ
bhaje vāyu putram pavitrāpta mitraṁ ॥ 1 ॥

"Salutations to the son of Vayu (Hanuman), who is the friend of the pious and the protector of those who surrender. His body is golden and radiant, he is the courage of the world and the bravery that dispels fear. His steadfastness is like the Himalayas, and he reduces the weapons of enemies to mere straw. I bow to him who excels in battle and is a source of purity and strength."

भजे राम रम्भावनी नित्यवसं, भजे बाल भानु प्रभाचारु भासं ।
भजे चन्द्रिका कुन्द मन्दार हासं, भजे सन्ततं राम भूपाल दासं ॥ २ ॥
bhaje rāma rambhāvanī nityavasaṁ
bhaje bāla bhānu prabhācāru bhāsaṁ ।
bhaje candrikā kunda mandāra hāsaṁ
bhaje santataṁ rāma bhūpāla dāsaṁ ॥ 2 ॥

"I worship the one who always resides in the forest of Ram's mind, who shines with the splendor of the rising sun. I worship the one whose smile is as beautiful as the moonlight, jasmine, and mandara flowers. I constantly worship the servant of King Rama."

भजे लक्ष्मण प्राण रक्षादि दक्षं, भजे तोषिदानके गीर्वाण पक्षं ।
भजे घोर सङ्ग्राम सीम्ह दाक्षं, भजे राम नामादि सम्प्राप्त रक्षं ।। ३ ।।

bhaje lakṣmaṇa prāṇa rakṣādi dakṣaṁ
bhaje toṣidānake gīrvāṇa pakṣaṁ ।
bhaje ghora saṅgrāma sīmha dākṣaṁ
bhaje rāma nāmādi samprāpta rakṣaṁ ॥ 3 ॥

"I worship the one skilled in protecting Lakshmana's life, who is delighted by charitable acts and the side of the gods. I worship the one proficient in the fierce battlefield, who attains protection by the name of Rama."

करालाट्ट हासंक्षिति क्षिप्त पादं, घन घ्रान्त भृङ्ग कटिस्तोरु जङ्घं ।
वियद्-व्याप्त केशं भुजाश्लेषिताश्मं, जय श्री समेतं भजे राम दूतम् ।। ४ ।।

karālāṭṭa hāsaṁkṣiti kṣipta pādaṁ
ghana ghrānta bhṛṅga kaṭistoru jaṅghaṁ ।
viyad-vyāpta keśaṁ bhujāśleṣitāśmaṁ
jaya śrī sametaṁ bhaje rāma dūtam ॥ 4 ॥

"I worship the messenger of Rama, whose terrifying laughter shakes the earth and whose feet move swiftly. His thighs and shanks are like iron pillars, and his hair spreads across the sky. He holds a rock in his arms and is ever victorious, accompanied by the goddess of prosperity (Shri)."

छलद्बाल घात भ्रमच्चक्र वालम्, कटोराट्ट हासं प्रभिन्नाब्ज जाण्डं ।
महा सिम्ह-नादाद् विशीर्ण त्रिलोकं, भजे चाञ्जनेयं प्रभुं वज्र कायम् ।। ५ ।।

chaladvāla ghāta bhramaccakra vālam
kaṭorāṭṭa hāsaṁ prabhinnābja jāṇḍaṁ ।
mahā simha-nādād viśīrṇa trilokaṁ
bhaje cāñjaneyaṁ prabhuṁ vajra kāyam ॥ 5 ॥

"I worship the mighty son of Anjana, whose swiftly moving tail disrupts the whirlwinds, whose fierce laughter shatters the lotus-like universe. His great lion-like roar rends the three worlds, and he has a body as strong as a diamond."

- *Abhiṣekam*
- *Ṣoḍaśa upacāras*
- *Naivedyam*
- *Nirājanam & puṣpāñjali*

GṚHA ARCA PRATIṢṬHA VIDHIḤ

1. anujñā

सर्वेभ्यो श्री वैष्णवेभ्यो नमः ! sarvebhyo śrī vaiṣṇavebhyo namaḥ !

अशेष हे परिषत् भवत् पादमूले मया समर्पितां इमां सौवर्णीं यत्किञ्चद् दक्षिणां यथोक्त दक्षिणामिव स्वीकृत्य अस्य भगवतः श्री-भूमि-नीला समेतस्य परिवारस्य श्रीमद् आदि-नारायणस्य प्रतिष्ठ कर्मणः निर्विघ्न परिसमाप्तिर् भूयाद् इति भवन्तो महन्तो अनुगृह्णन्तु ॥

aśeṣa he pariṣat bhavat pādamūle mayā samarpitāṁ imāṁ sauvarṇīṁ yatkiñcad dakṣiṇāṁ yathokta dakṣiṇāmiva svīkṛtya asya bhagavataḥ śrī-bhūmi-nīlā sametasya parivārasya śrīmad ādi-nārāyaṇasya pratiṣṭha karmaṇaḥ nirvighna parisamāptir bhūyād iti bhavanto mahanto anugṛhṇantu ॥

O revered assembly, I offer at your feet this small golden donation as if it were the prescribed offering. By accepting this offering, may the installation ceremony of the Lord, along with His consorts Bhūmi and Nīla, the glorious Adi-Narayana, be completed without any obstacles. May you, O great ones, bestow your blessings upon us.

2. Viśvaksena Pūjā

3. Mahā Saṅkalpam

ॐ श्री गोविन्द गोविन्द गोविन्द, आद्य श्री भगवतो महा पुरुषस्य ---------- अस्मिन् वर्तमाने व्यवहारिके प्रभवादि षष्टि सम्वत्सराणां मध्ये, ... सम्वत्सरे, ... अयने, ... ऋतौ, ... मासे, ... पक्षे, ... तिथौ, ... वासरे, ... नक्षत्रे, एवं गुण विशेषण विसिष्ठायां अस्यां शुभ तिथौ;–

अस्यानन्त गरुड विष्वक्सेनादि नित्यसूरि परिषत् संसेव्यमानस्य पराङ्कुश परकाल यतिवरादि भक्तैस्सन्तत समर्चित चरण युगलस्य महाजल कमल मध्य परिभ्राम्यमाण अनेक कोटि सूर्य प्रभा समेतस्य श्री-भूमि-नीला कुच कलश विन्यस्त कुङ्कुमाङ्कित वक्षस्थल नायकस्य, शेष-पर्यङ्क-शायिनः, शङ्ख चक्र गदा पद्म खड्ग शार्ङ्ग हस्त विराजितस्य, सौशील्य वात्सल्यादि गुण युक्तस्य श्रीमन् नारायणस्य भगवतो दिव्याज्ञया, भगवत् कैङ्कर्य रूपेण अस्य अशेष चिदाचिद् वस्तु शेषी भूतस्य सत्य ज्ञान अनन्त आनन्द अमल स्वरूपस्य श्रीवल्लभस्य ज्ञान शक्ति बलैश्वर्य वीर्य शक्ति तेजस् सौशील्य वात्सल्य स्वामित्व सर्वज्ञत्व सर्वशक्तत्व परम-कारुणिकत्व कृतित्व कृतज्ञत्व परिपूर्णत्व परमोदारत्व मार्दव आर्जव सौगन्ध्य सौकुमार्यादि गुण गणौघ महार्णवस्य, अभिनव जल-धर सुन्दर दिव्य मङ्गल विग्रहस्य, भगवतो नारायणस्य सान्निध्य सिद्ध्यर्थं _____ मूर्ति प्रतिष्ठाम् अहं करिष्यामि, क्रियापलस्य आत्मगामित्वे करिष्ये ॥

oṁ śrī govinda govinda govinda, ādya śrī bhagavato mahā puruṣasya ---------- asmin vartamāne vyavahārike prabhavādi ṣaṣṭi samvatsarāṇāṁ madhye, ... samvatsare, ... ayane, ... ṛtau, ... māse, ... pakṣe, ... tithau, ... vāsare, ... nakṣatre, evaṁ guṇa viśeṣaṇa visiṣṭhāyāṁ asyāṁ śubha tithau;–

asyānanta garuḍa viṣvaksenādi nityasūri pariṣat saṁsevyamānasya parāṅkuśa parakāla yativarādi bhaktaissantata samarcita caraṇa yugaḷasya mahājala kamala madhya paribhrāmyamāṇa aneka koṭi sūrya prabhā sametasya śrī-bhūmi-nīlā kuca kalaśa vinyasta kuṅkumāṅkita vakṣasthala nāyakasya, śeṣa-paryaṅka-śāyinaḥ, śaṅkha cakra gadā padma khaḍga śārṅga hasta virājitasya, sauśīlya vātsalyādi guṇa yuktasya śrīman nārāyaṇasya bhagavato divyājñayā, bhagavat kaiṅkarya rūpeṇa asya aśeṣa cidācid vastu śeṣī bhūtasya satya jñāna ananta ānanda amala svarūpasya śrīvallabhasya jñāna śakti balaiśvarya vīrya śakti tejas sauśīlya vātsalya svāmitva sarvajñatva sarvaśaktatva parama-kāruṇikatva kṛtitva kṛtajñatva paripūrṇatva paramodāratva mārdava ārjava saugandhya saukumāryādi guṇa gaṇaugha mahārṇavasya, abhinava jala-dhara sundara divya maṅgaḷa vigrahasya, bhagavato nārāyaṇasya sānnidhya siddhyarthaṁ _____ mūrti pratiṣṭhām ahaṁ kariṣyāmi, kriyāpalasya ātmagāmitve kariṣye ॥

"By the divine command of Lord Narayana, who is eternally served by the assembly of everlasting celestials like Ananta, Garuda, Vishvaksena, and others; whose twin feet are constantly worshipped by the foremost devotees like Parankusa and Parakala; whose radiance is like countless suns in the midst of the great cosmic lotus; who has the mark of kumkum from the breasts of Shri, Bhu, and Neela on his chest; who reclines on the serpent bed of Adishesha; who is resplendent with the conch, discus, mace, lotus, sword, and bow in his hands; who is endowed with virtues like nobility and parental affection; whose divine form is as beautiful as a fresh rain cloud; and who possesses infinite qualities such as omniscience, omnipotence, supreme compassion, gratitude, complete perfection, and supreme generosity:

To achieve the presence of such a Lord Narayana, who is the master of all sentient and non-sentient beings, and whose nature is truth, knowledge, infinity, bliss, and purity, I am establishing this _____ murti (idol/image) with the intent of performing service to the Lord. I will ensure that the result of this action leads to the attainment of my true purpose."

तद् अङ्गत्वेन पुण्याह वाचनं करिष्ये । tad aṅgatvena puṇyāha vācanaṁ kariṣye ।
As an adjunct to this ceremony I shall perform the purification ritual.

4. Vāsudeva Puṇyāha Vācanam
5. Pañcāmṛta Kalaśa Sthāpanam

- *Prepare the kalaśas upon the snapana vedi & Invoke the following*

1. Curd — ॐ नमो भगवते विष्णवे आगच्छागच्छ
oṁ namo bhagavate viṣṇave āgacchāgaccha
2. Milk — ॐ नमो भगवते मधुसूदनाय आगच्छागच्छ
oṁ namo bhagavate madhusūdanāya āgacchāgaccha
3. Honey — ॐ नमो भगवते त्रिविक्रमाय आगच्छागच्छ
oṁ namo bhagavate trivikramāya āgacchāgaccha
4. Sugar — ॐ नमो भगवते वामनाय आगच्छागच्छ
oṁ namo bhagavate vāmanāya āgacchāgaccha
5. Ghee — ॐ नमो भगवते वासुदेवाय आगच्छागच्छ
oṁ namo bhagavate vāsudevāya āgacchāgaccha

- *Offer upacaras and recite;*

ॐ भगवान् पवित्रं वासुदेवः पवित्रं तत् पादौ पवित्रं तत् पादोदकं पवित्रं शतधारं सहस्रधारं अपरिमित धारं अच्छिद्रं अरिष्टं अक्षय्यं अनन्तं अपरिमितं परमं पवित्रं भगवान् वासुदेवः पुनातु ।
oṁ bhagavān pavitraṁ vāsudevaḥ pavitraṁ tat pādau pavitraṁ tat pādodakaṁ pavitraṁ śatadhāraṁ sahasradhāraṁ aparimita dhāraṁ acchidraṁ ariṣṭaṁ akṣayyaṁ anantaṁ aparimitaṁ paramaṁ pavitraṁ bhagavān vāsudevaḥ punātu.

6. Bhagavad śānti Homam

Sankalpam ॐ एवं पूर्वोक्त गुण विशेषण विसिष्ठायां अस्यां शुभ तिथौ श्री भगवद् आज्ञया भगवद् कैङ्कर्य रूपेण बिम्बस्य मानोन्मामादि न्यूनातिरिक्त प्रायश्चित्तार्थं शन्ति होमं करिष्ये ॥
oṁ evaṁ pūrvokta guṇa viśeṣaṇa visiṣṭhāyāṁ asyāṁ śubha tithau śrī bhagavad ājñayā bhagavad kaiñkarya rūpeṇa bimbasya mānonmāmādi nyūnātirikta prāyaścittārthaṁ śanti homaṁ kariṣye ॥

On this auspicious day, with the aforementioned qualities and attributes, by the command of the revered Lord, as a service to the Lord, I shall perform the Shanti Homa (peace offering) for the purpose of atonement for any deficiencies or excesses in the measurements and other aspects of the icon.

- *With shami patra and aksata offer seven oblations with each of the vyahrtis.*

Vyāhṛti Homaḥ

ॐ भूः स्वाहा - भूरिदं । ॐ भुवः स्वाहा - भुव-इदं । ॐ सुवः स्वाहा - सुव इदं । ॐ महः स्वाहा - महस इदं । ॐ जनः स्वाहा - जनायेदं । ॐ तपः स्वाहा - तपस इदं । ओगुं सत्यं स्वाहा - सत्यायेदं न मम ॥
oṁ bhūḥ svāhā - bhūr-idaṁ । oṁ bhuvaḥ svāhā - bhuva-idaṁ । oṁ suvaḥ - svāhā suva idaṁ । oṁ mahaḥ svāhā - mahasa idaṁ । oṁ janaḥ svāhā - janāyedaṁ । oṁ tapaḥ svāhā - tapasa idaṁ । oguṁ satyaṁ svāhā - satyāyedaṁ na mama ॥

Puruṣa sūkta Homaḥ

- *Then with the purusa sūktam offer ghee and payasannam[8].*

१. ॐ सहस्र शीर्षा पुरुषः । सहस्राक्षः सहस्र पात् । स भूमिं विश्वतो वृत्वा । अत्य-तिष्ठद् दशाङ्गुलं स्वाहा ॥
1. oṁ sahasra śīrṣā puruṣaḥ । sahasrākṣaḥ sahasra pāt ।
sa bhūmiṁ viśvato vṛtvā । atya-tiṣṭhad daśāṅgulaṁ svāhā ॥

२. ॐ पुरुष एवेदगुं सर्वं । यद् भूतं यच्च भव्यम् । उतामृतत्व स्येशानः । यद् अन्नेना-तिरोहति स्वाहा ॥
2. oṁ puruṣa evedaguṁ sarvaṁ । yad bhūtaṁ yac ca bhavyam ।
utāmṛtatva syeśānaḥ । yad annenā-tirohati svāhā ॥

३. ॐ एतावानस्य महिमा । अतो ज्यायागुंश्च पूरुषः । पादोऽस्य विश्वा भूतानि । त्रिपाद् अस्यामृतं दिवि स्वाहा ॥
3. oṁ etāvān asya mahimā । ato jyāyāguṁś ca pūruṣaḥ ।
pādo'sya viśvā bhūtāni । tripād asyāmṛtaṁ divi svāhā ॥

४. ॐ त्रिपाद् ऊर्ध्व उदैत् पुरुषः । पादोऽस्येहाभवात् पुनः । ततो विश्वङ् व्यक्रामत् । साशनानशने अभि स्वाहा ॥
4. oṁ tripād ūrdhva udait puruṣaḥ । pādo'syehābhavāt punaḥ ।
tato viśvaṅ vyakrāmat । sāśanānaśane abhi svāhā ॥

५. ॐ तस्माद्विराड् अजायत । विराजो अधि पुरुषः । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरस्स्वाहा ॥
5. oṁ tasmād virāḍ ajāyata । virājo adhi puruṣaḥ ।
sa jāto atyaricyata । paścād bhūmim atho puras svāhā ॥

६. ॐ यत् पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यं । ग्रीष्म इध्मः शरधविस्स्वाहा ॥
6. oṁ yat puruṣeṇa haviṣā । devā yajñam atanvata ।
vasanto asyāsīd ājyaṁ । grīṣma idhmaḥ śarad havis svāhā ॥

७. ॐ सप्तास्यासन् परिधयः । त्रिः सप्त समिधः कृताः । देवा यद् यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुं स्वाहा ॥
7. oṁ saptāsyāsan paridhayaḥ । triḥ sapta samidhaḥ kṛtāḥ ।
devā yad yajñaṁ tanvānāḥ । abadhnan puruṣaṁ paśum svāhā ॥

८. ॐ तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातम् अग्रतः । तेन देवा अयजन्त । साध्या ऋषयश्च ये स्वाहा ॥
8. oṁ taṁ yajñaṁ barhiṣi praukṣan । puruṣaṁ jātam agrataḥ ।
tena devā ayajanta । sādhyā ṛṣayaś ca ye svāhā ॥

९. ॐ तस्माद्यज्ञात् सर्व हुतः । सम्भृतं पृषद् आज्यम् । पषूगुंस्तागुंश्चक्रे वायव्यान् । आरण्यान् ग्राम्याश्च ये स्वाहा ॥
9. oṁ tasmād yajñāt sarva hutaḥ । sambhṛtaṁ pṛṣad ājyam ।
paṣūguṁs tāguṁś cakre vāyavyān । āraṇyān grāmyāśca ye svāhā ॥

१०. ॐ तस्माद्यज्ञात् सर्व हुतः । ऋचः सामानि जज्ञिरे । छन्दागुंसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत स्वाहा ॥
10. oṁ tasmād yajñāt sarva hutaḥ । ṛcaḥ sāmāni jajñire ।
chandāguṁsi jajñire tasmāt । yajus tasmād ajāyata svāhā ॥

११. ॐ तस्मादश्व अजायन्त । ये के चोभयादतः । गवो ह जज्ञिरे तस्मात् । तस्माज्जाता अजा वयस्स्वाहा ॥
11. oṁ tasmād aśva ajāyanta । ye ke cobhayādataḥ ।
gavo ha jajñire tasmāt । tasmāj jātā ajā vayas svāhā ॥

१२. ॐ यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । का वूरू पादावुच्येते स्वाहा ॥
12. oṁ yat puruṣaṁ vyadadhuḥ । katidhā vyakalpayan ।
mukhaṁ kim asya kau bāhū । kā vūrū pādāv ucyete svāhā ॥

---

[8] A preparation of 3 parts of milk to 1 part of rice.

१३. ॐ ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः । पद्भ्यागुं शूद्रो अजायत स्वाहा ॥
13. oṁ brāhmaṇo'sya mukham āsīt | bāhū rājanyaḥ kṛtaḥ |
ūrū tad asya yad vaiśyaḥ | padbhyāguṁ śūdro ajāyata svāhā ||

१४. ॐ चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुर् अजायत स्वाहा ॥
14. oṁ candramā manaso jātaḥ | cakṣoḥ sūryo ajāyata |
mukhād indraś cāgniś ca | prāṇād vāyur ajāyata svāhā ||

१५. ॐ वेदाहमेतं पुरुषं महान्तम् । आदित्य वर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्यदास्ते स्वाहा ॥
15. oṁ vedāham etaṁ puruṣaṁ mahāntam | āditya varṇaṁ tamasas tu pāre |
sarvāṇi rūpāṇi vicitya dhīraḥ | nāmāni kṛtvā'bhivadan yadāste svāhā ||

१६. ॐ धाता पुरस्ताद्यम् उदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः ।
तम् एवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते स्वाहा ॥
16. oṁ dhātā puras tād yam udājahāra | śakraḥ pravidvān pradiśaś-catasraḥ |
tam evaṁ vidvān amṛta iha bhavati | nānyaḥ panthā ayanāya vidyate svāhā ||

१७. ॐ यज्ञेन यज्ञम् अयजन्त देवाः । तानि धर्माणि प्रथमा-न्यासन्
ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे साध्यास् सन्ति देवास्स्वाहा
17. oṁ yajñena yajñam ayajanta devāḥ | tāni dharmāṇi prathamā-nyāsan
te ha nākaṁ mahimānas sacante | yatra pūrve sādhyās santi devās svāhā ||

Pañcavyūha Homaḥ

❖ *With the pañcopanisad mantras offer 100 oblations each.*

ॐ षौं नमः पराय परमेष्ठ्यात्मने वासुदेवाय स्वाहा ॥
oṁ ṣauṁ namaḥ parāya parameṣṭhyātmane vāsudevāya svāhā ||
ॐ यां नमः पराय पुरुषात्मने सङ्कर्षणाय स्वाहा ॥
oṁ yāṁ namaḥ parāya puruṣātmane saṅkarṣaṇāya svāhā ||
ॐ रां नमः पराय विश्वात्मने प्रद्युम्नाय स्वाहा ॥
oṁ rāṁ namaḥ parāya viśvātmane pradyumnāya svāhā ||
ॐ वां नमः पराय निवृत्यात्मने अन्निरुद्धाय स्वाहा ॥
oṁ vāṁ namaḥ parāya nivṛtyātmane anniruddhāya svāhā ||
ॐ लां नमः पराय सर्वात्मने नारायणाय स्वाहा ॥
oṁ lāṁ namaḥ parāya sarvātmane nārāyaṇāya svāhā ||

Viṣṇu Gāyatri Homaḥ

ॐ नारायणाय विद्महे । वासुदेवाय धीमहि । तन्नो विष्णु प्रचोदयात् स्वाहा ॥
oṁ nārāyaṇāya vidmahe | vāsudevāya dhīmahi | tanno viṣṇu pracodayāt svāhā ||

7. Pūrṇahuti
8. Prārthana

नमस्तुभ्यं भगवते जातवेदस्वरूपिणे । नरायण हव्यस्य भोक्त्रे यज्ञ स्वरूपिणे ।
namastubhyaṁ bhagavate jātavedasvarūpiṇe
narāyaṇa havyasya bhoktre yajña svarūpiṇe |
इष्ट-दैवाय देवानाम्-आत्मने परमात्मने । सन्निधत्स्व चिरं देव प्रतिमायां हिताय नः ॥
iṣṭa-daivāya devānām-ātmane paramātmane |
sannidhatsva ciraṁ deva pratimāyāṁ hitāya naḥ ||

"Salutations to you, O Lord, who is in the form of the all-knowing fire. To Narayana, the enjoyer of oblations, the

embodiment of sacrifice. To the desired deity of the gods, the soul, the supreme soul. Please dwell forever, O Lord, in this image for our welfare."

- *Then cover the bera with darbha and a new cloth, recite the visnu gayatri and offer 16 upacaras to the lord. Tie a sutra of 7 threads stained with tumeric to the right hand of the lord and the left hand of Laksmi.*

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन । नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥
jitante puṇḍarīkākṣa namaste viśvabhāvana ।
namaste'stu hṛṣīkeśa mahāpuruṣa pūrvaja ॥
Victory to You O Lotus-eyed One, obeisance to the Universal object of meditation,
Obeisance to You Master-of-the-senses, the Great Being that was first manifest.

- *Spread a load of rice in the form of a circle, cover with a cloth and spread til.*
- *cover with another cloth draw a lotus and place the simhasana upon this.*
- *Sprinkle with the punyaha water.*

सुप्रतिष्ठो भव supratiṣṭho bhava

- *And place the icons upon it.*

स्वागतं देव-देवेश विश्वरूप नमस्तुते । शुद्धेऽपि त्वद्-अधिष्ठाने शुद्धिं कुर्मः सहस्वताम् ॥
svāgataṁ deva-deveśa viśvarūpa namastute ।
śuddhe'pi tvad-adhiṣṭhāne śuddhiṁ kurmaḥ sahasvatām ॥

"Welcome, O Lord of lords, ruler of the universe, salutations to you. Although your abode is pure, we perform purification. Please accept this."

- *Offer arghyam, padyam, acamanam, madhuparkam, nirajanam.*
- *In front of the Lord spread out a square heap of rice.*
- *In the four directions establish four kalasas. Recite astra mantra, show surabhi mudra, charge each one with the mūla mantra 100 times.*
- *Repeat svagata mantra, offer arghya, padya, acamanam then repeat visnor nukam and then perform Abhiṣekam*

9. Abhiṣekam

- *Clean the bimbas and establish 6 kalasas in front of them,*
- *Bathe the Bimbas with the following mantras;*

Milk — आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् । भवा वाजस्य सङ्गथे ॥
āpyāyasva sametu te viśvataḥ soma vṛṣṇiyam । bhavā vājasya saṅgathe ।

Yoghurt — दधि क्राविण्णो आकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्रण आयूगुंषि तारिषत् ॥
dadhi krāviṇṇo ākāriṣaṁ jiṣṇor aśvasya vājinaḥ ।
surabhi no mukhā karat praṇa āyūguṁṣi tāriṣat ॥

Ghee — शुक्रम् असि ज्योतिर् असि तेजोसि देवो वः सवितोत्-पुनात्वच्छिद्रेण पवित्रेण वसो सूर्यस्य रश्मिभिः ॥
śukram asi jyotir asi tejosi devo vaḥ savitot-punātvacchidreṇa pavitreṇa vaso sūryasya raśmibhiḥ ॥

Honey — मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः
madhuvātā ṛtāyate madhu kṣaranti sindhavaḥ । mādhvīrnaḥ santvoṣadhīḥ ॥

Sugar — ताः शर्करा अभवन् । तच्छर्कराणागुं शर्कर-त्वम् ॥

वृजोवै शर्कराः । पशुरग्निः । यच्छर्कराभिर्-अग्निं परिमिणोति । वज्रेणै वा स्मै पशून् परिगृह्णाति ॥

tāḥ śarkarā abhavan । taccharkarāṇāguṁ śarkara-tvam ॥
vṛjovai śarkarāḥ । paśur-agniḥ । yaccharkarābhir-agniṁ parimiṇoti ।
vajreṇai vā smai paśūn parigṛhṇāti ॥

Phalodakam

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पणीः" ।
बृहस्पति प्रसूता स्ता नो मुञ्चत्वगुं हसः ॥
yāḥ phalinīr yā aphalā apuṣpā yāśca puṣpaṇīḥ ।
bṛhaspati prasūtā stā no muñcatvaguṁ hasaḥ ॥

Puṣpodaka

पुष्पावतीः प्रसूवतीः फलिनीर् अफला उत ।
अश्वा इव सजित्वरीर् विरुधः पारयिष्णवः ॥
puṣpāvatīḥ prasūvatīḥ phalinīr aphalā uta ।
aśvā iva sajitvarīr virudhaḥ pārayiṣṇavaḥ ॥

10. Netra unmilanam

- *The icons are now screened from public view.*
- *The acarya takes a seat behind the screen and does pranayama.*

लक्ष्मी-नाथ समारम्भां नाथयामुन मध्यमाम् । अस्मताचार्य पर्यन्तां वन्दे गुरु परम्पराम् ॥
lakṣmī-nātha samārambhāṁ nāthayāmuna madhyamām ।
asmat ācārya paryantāṁ vande guru paramparām ॥

- *Spread layers of paddy, rice and sesame on top place two cups one of gold with honey and one of silver with ghee.*
- *Place a silver skewer in each cup.*
- *Cover with a new cloth and sprinkle with punyaha water.*

Saṅkalpaḥ — ॐ एवं पूर्वोक्त गुण विशेषण विसिष्ठायां अस्यां शुभ तिथौ भगवद् आज्ञया भगवद् कैङ्कर्य रूपेण अस्मिन् प्रतिष्ठाकर्मणि अद्याहं नेत्रोन्मीलनं करिष्ये ॥
oṁ evaṁ pūrvokta guṇa viśeṣaṇa visiṣṭhāyāṁ asyāṁ śubha tithau bhagavad ājñayā bhagavad kaiṅkarya rūpeṇa asmin pratiṣṭhākarmaṇi adyāhaṁ netronmīlanaṁ kariṣye ॥

- *Invoke Sun in the gold cup*

घृणिः सूर्य आदित्यो न प्रभां वात्यक्षरम् । मधु क्षरन्ति तद् रसम् । सत्यं वै तद् रसम् आपो ज्योती रसोऽमृतम् ब्रह्म भूर्भुवः सुवरोम् ॥
ghṛṇiḥ sūrya ādityo na prabhā vātyakṣaram । madhu kṣaranti tad rasam । satyaṁ vai tad rasam āpo jyotī raso'mṛtam brahma bhūrbhuvaḥ suvarom ॥

- *Invoke moon in the silver cup.*

अप्सु मे सोमो अब्रवीदन्तर्-विश्वानि भेषजा । अग्निञ्च विश्व शंभुवम् आपश्च विश्व भेषजीः ॥
apsu me somo abravīdantar-viśvāni bheṣajā ।
agniñca viśva śaṁbhuvam āpaśca viśva bheṣajīḥ ॥

- *Offer upacaras.*
- *Sanctify the honey with;*

मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधु नक्तं उतोषसि मधुमत् पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥ मधु मान्नो वनस्पतिर्मधुमागुं अस्तु सूर्यः । माध्वीर्गावो भवन्तु ॥

madhuvātā ṛtāyate madhu kṣaranti sindhavaḥ । mādhvīrnaḥ santvoṣadhīḥ ॥ madhu naktaṁ utoṣasi madhumat pārthivaguṁ rajaḥ । madhu dyaur astu naḥ pitā ॥ madhu mānno vanaspatir madhumāguṁ astu sūryaḥ । mādhvīr gāvo bhavantu ॥

❖ *Take the skewer 8 inches long, dip it in honey with the mantra*

चित्रं देवानाम् उदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आ प्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्तुषश्च ॥

citraṁ devānām udagādanīkaṁ cakṣur mitrasya varuṇasyāgneḥ ।
ā prā dyāvā-pṛthivī antarikṣagm̐ sūrya ātmā jagatas-tastuṣaśca ॥

❖ *Draw it across the right eye.*

❖ *Sanctify the ghee and repeat the procedure with the left eye;*

तच्चक्षुर्देव-हितं पुरस्ताच्छुक्रम्-उच्चरत् । पश्येम शरदः शतं, जीवेम शरदः शतं, नन्दाम शरदः शतं, मोदाम शरदः शतं, भवाम शरदः शतं, शृणुयाम शरदः शतं, प्रब्रवाम शरदः शतं, अजीताः स्याम शरदः शतं, ज्योक् चा सूर्यं दृशे ॥

taccakṣur deva-hitaṁ purastācchukram-uccarat । paśyema śaradaḥ śataṁ, jīvema śaradaḥ śataṁ, nandāma śaradaḥ śataṁ, modāma śaradaḥ śataṁ, bhavāma śaradaḥ śataṁ, śṛṇuyāma śaradaḥ śataṁ, prabravāma śaradaḥ śataṁ, ajītāḥ syāma śaradaḥ śataṁ, jyok cā sūryaṁ dṛśe ॥

यदाञ्जनं त्रैक-कुदं जातगुं हिमवतस्परि । तेनामृतस्य मूलेनारातिर् जम्भयामसि ॥

yadāñjanaṁ traika-kudaṁ jātaguṁ himavataspari ।
tenāmṛtasya mūlenārātir jambhayāmasi ॥

❖ *Remove the screen and show the maṅgala dravyam,*

Mānasika Pūjā

❖ *Perform mental worship of the Lord;*

ॐ लं पृथिव्यात्मने गन्धं परिकल्पयामि ।	oṁ laṁ pṛthivyātmane gandhaṁ parikalpayāmi ।
ॐ हं आकाशात्मने पुष्पं परिकल्पयामि ।	oṁ haṁ ākāśātmane puṣpaṁ parikalpayāmi ।
ॐ यं वायुरात्मने धूपं परिकल्पयामि ।	oṁ yaṁ vāyurātmane dhūpaṁ parikalpayāmi ।
ॐ रं तेजात्मने दीपं परिकल्पयामि ।	oṁ raṁ tejātmane dīpaṁ parikalpayāmi ।
ॐ वं अमृतात्मने नैवेद्यं परिकल्पयामि ।	oṁ vaṁ amṛtātmane naivedyaṁ parikalpayāmi ।
ॐ सं सर्वात्मने ताम्बूलं परिकल्पयामि ।	oṁ saṁ sarvātmane tāmbūlaṁ parikalpayāmi ।

❖ *Prepare the pañcapātra according to the rites;*

Prāṇa Pratiṣṭha

अस्य श्री प्राण प्रतिष्ठ महा मन्त्रस्य ।	asya śrī prāṇa pratiṣṭha mahā mantrasya ।
ब्रह्म-विष्णु महेश्वरा ऋष्यः ।	brahma-viṣṇu maheśvarā ṛṣyaḥ ।
ऋग्-यजुः साम अथर्वाणि छन्दांसि ।	ṛg-yajuḥ sāma atharvāṇi chandāṁsi ।
सकल सृष्टि-स्थिति-संहार कारिणी प्राण शक्तिः परा देवता ।	sakala sṛṣṭi-sthiti-saṁhāra kāriṇī prāṇa śaktiḥ parā devatā ।

आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् ।	āṁ bījam । hrīṁ śaktiḥ । kroṁ kīlakam ।
ॐ अङ्गुष्ठाभ्यां नमः ।	oṁ aṅguṣṭhābhyāṁ namaḥ ।
ह्रीं तर्जनीभ्यां नमः ।	hrīṁ tarjanībhyāṁ namaḥ ।
क्रों मध्यमाभ्याम् नमः ।	kroṁ madhyamābhyām namaḥ ।
आं अनामिकाभ्याम् नमः ।	āṁ anāmikābhyām namaḥ ।
क्रों कर-तल-कर-पृष्ठाभ्याम् नमः ।	kroṁ kara-tala-kara-pṛṣṭhābhyām namaḥ ।
आं हृदयाय नमः ।	āṁ hṛdayāya namaḥ
ह्रीं शिरसे स्वाहा ।	hrīṁ śirase svāhā ।
क्रों शिखायय् वषट् ।	kroṁ śikhāyay vaṣaṭ ।
आं कवचाय हुं ।	āṁ kavacāya huṁ ।
ह्रीं नेत्र-त्रयाय वौषट् ।	hrīṁ netra-trayāya vauṣaṭ ।
क्रों अस्त्राय फट् ।	kroṁ astrāya phaṭ ।

पद्म-प्रिये पद्मिनि पद्म-हस्ते पद्मालये पद्म-दलायताक्षि ।
विश्व-प्रिये विष्णु मनोनुकूले त्वत् पाद पद्मम् मयि सन्निधत्स्व ॥
padma-priye padmini padma-haste padmālaye padma-dalāyatākṣi ।
viśva-priye viṣṇu mano'nukūle tvat pāda padmam mayi sannidhatsva ॥

O Lakshmi with eyes like lotuses and to who lotuses are dear, who holds lotuses in her hands, and dwells within the lotus of the heart, the beloved of the whole world and the one to whom Vishnu conceeds, may your lotus feet always be the object of contemplation for me.

आं ह्रीं क्रों क्रों ह्रीं आं । य र ल व श ष स हों हंसः सोहं सोहं हंसः । अस्यां मूर्तौ जीवस्-तिष्ठतु । अस्यां मूर्तौ सर्वेन्द्रियाणि मनस्-त्वक्-चक्षुः-श्रोत्र-जिह्वा-घ्राण-वाक्-पाणि-पाय-पायुस्थाख्यानि प्राणापान व्यानोदान समानाश्चागत्य सुखम् चिरं तिष्ठन्तु स्वाहा ॥
āṁ hrīṁ kroṁ kroṁ hrīṁ āṁ । ya ra la va śa ṣa sa hoṁ haṁsaḥ sohaṁ sohaṁ haṁsaḥ । asyāṁ mūrtau jīvas-tiṣṭhatu । asyāṁ mūrtau sarvendriyāṇi manas-tvak-cakṣuḥ-śrotra-jihvā-ghrāṇa-vāk-pāṇi-pāya-pāyusthākhyāni prāṇāpāna vyānodāna samānāś-cāgatya sukham ciraṁ tiṣṭhantu svāhā ॥

"May life reside in this image. May all the senses—mind, skin, eyes, ears, tongue, nose, speech, hands, feet, excretory and reproductive organs, and the life forces (prana, apana, vyana, udana, and samana)— please be present and dwell here comfortably and for a long time. Svaha (an offering)."

असुनीते पुनरस्मासु चक्षुः पुनः प्राणम् इह नो धेहि भोगम् ।
ज्योक् पश्येम सूर्यम् उच्चरन्तम् अनुमते मृलया नः स्वस्ति ॥
asunīte punar asmāsu cakṣuḥ punaḥ prāṇam iha no dhehi bhogam ।
jyok paśyema sūryam uccarantam anumate mṛḷayā naḥ svasti ॥

O life-giving one, restore our sight once again, restore our breath here for us and grant us enjoyment. May we see the rising sun for a long time. O gracious one, bless us with well-being.

❖ *Touch the whole icon with the muṣṭi.*

ॐ ह्रां ह्रीं क्रौं हंसः ।
अस्य श्रीमन्नारायणस्य महा-लक्ष्म्याश्च इह जीव इह स्थितः सुखेन चिरं तिष्ठन्तु स्वाहा ॥
oṁ hrāṁ hrīṁ krauṁ haṁsaḥ । asya śrīman-nārāyaṇasya mahā-lakṣmyāśca iha jīva iha sthitaḥ sukhena ciraṁ tiṣṭhantu svāhā ॥ heart

ॐ आं ह्रीं क्रौं हंसः ।
अस्य श्रीमन्नारायणस्य महा-लक्ष्म्याश्च सर्वेन्द्रियाणि इहागत्य सुखेन चिरं तिष्ठन्तु स्वाहा ॥
oṁ āṁ hrīṁ krauṁ haṁsaḥ ।

asya śrīman-nārāyaṇasya mahā-lakṣmyāśca sarvendriyāṇi ihāgatya sukhena ciraṁ tiṣṭhantu svāhā ॥
all organs

ॐ ह्रीं क्रौं हंसः ।

अस्य श्रीमन्नारायणस्य महा-लक्ष्म्याश्च वाङ् मनश्चक्षु श्रोत्र प्राणा इहागत्य सुखेन चिरं तिष्ठन्तु स्वाहा ॥
oṁ hrīṁ krauṁ haṁsaḥ ।
asya śrīman-nārāyaṇasya mahā-lakṣmyāśca vāṅ manaś-cakṣu śrotra prāṇā ihāgatya sukhena ciraṁ tiṣṭhantu svāhā ॥ head

ॐ आं ह्रीं क्रौं हंसः ।

अस्य श्रीमन्नारायणस्य महा-लक्ष्म्याश्च वागिहागत्य सुखेन चिरं तिष्ठन्तु स्वाहा ॥
oṁ āṁ hrīṁ krauṁ haṁsaḥ ।
asya śrīman-nārāyaṇasya mahā-lakṣmyāśca vāg-ihāgatya sukhena ciraṁ tiṣṭhantu svāhā ॥ face

Pañcopaniṣad Nyāsam

ॐ षौं नमः पराय परमेष्ठ्यात्मने नमः ॥
oṁ ṣauṁ namaḥ parāya parameṣṭhyātmane namaḥ ॥ head

ॐ यां नमः पराय पुरुषात्मने नमः ॥
oṁ yāṁ namaḥ parāya puruṣātmane namaḥ ॥ nose

ॐ रां नमः पराय विश्वात्मने नमः ॥
oṁ rāṁ namaḥ parāya viśvātmane namaḥ ॥ heart

ॐ वां नमः पराय निवृत्यात्मने नमः ॥
oṁ vāṁ namaḥ parāya nivṛtyātmane namaḥ ॥ genitals

ॐ लां नमः पराय सर्वात्मने नमः ॥
oṁ lāṁ namaḥ parāya sarvātmane namaḥ ॥ feet

ॐ नमो भगवते वासुदेवाय ॥
oṁ namo bhagavate vāsudevāya ॥ All organs

ब्रह्माद्याः सकला देवा यन्न स्मर्तुम् अपीश्वराः । स एष भगवान् अद्य मम प्रत्यक्षतां गतः ॥ १ ॥
brahmādyās sakalā devā yanna smartum apīśvarāḥ ।
sa eṣa bhagavān adya mama pratyakṣatāṁ gataḥ ॥ 1 ॥
"All the gods, starting with Brahma, are unable to even think of you, O Supreme Lord. Today, that very Lord has manifested before me."

स्वागतं भगवन् अद्य मां तारयितुं आगतः । धन्योऽस्म्यनुगृहीतोऽस्मि कृतार्थोऽस्मि कृपानिधे ॥ २ ॥
svāgataṁ bhagavan adya māṁ tārayituṁ āgataḥ ।
dhanyo'smy-anugṛhīto'smi kṛtārtho'smi kṛpānidhe ॥ 2 ॥
"Welcome, O Lord, today you have come to liberate me. I am blessed, I am favored, I am fulfilled, O ocean of compassion."

आवाहयामि लक्ष्मीशं परमात्मानम् अव्ययम् । पञ्चोपनिषद् आत्मानं दिव्य मङ्गल विग्रहम् ॥ ३ ॥
āvāhayāmi lakṣmīśaṁ paramātmānam avyayam ।
pañcopaniṣad ātmānaṁ divya maṅgala vigraham ॥ 3 ॥
"I invoke Lakshmi's Lord, the Supreme Being, the imperishable one, the embodiment of the five Upanishads, and the one with a divine and auspicious form."

आतिष्ठताम् इमां मूर्तिं मदनुग्रह काम्यया । श्रिया सार्धं जगन्नाथो दिव्यो नारायण प्रभुः ॥ ४ ॥
ātiṣṭhatām imāṁ mūrtiṁ mad anugraha kāmyayā ।
śriyā sārdhaṁ jagan-nātho divyo nārāyaṇa prabhuḥ ॥ 4 ॥
"May the divine Lord Narayana, the Lord of the universe, along with Shri (Lakshmi), graciously reside in this image for my welfare."

ॐ ॐ ॐ परम धामा-वस्थित मद् अनुग्रह काम्ययोध्यत् आवतार इहा भीमत सिद्धिद मन्त्र शरीर् ॐ नमो नमः ॥

oṁ oṁ oṁ parama dhāmā-vasthita mad anugraha kāmyayodhyat āvatāra ihā bhīmata siddhida mantra śarīr oṁ namo namaḥ ॥

आवाहितो भव । स्थापितो भव । सन्निधो भव । सन्निरुद्धो भव । सन्निहितो भव । अवकुण्टिथो भव । सुप्रीतो भव । सुप्रसन्नो भव । सुमुखो भव । वरदो भव । प्रसीद प्रसीद ॥
āvāhito bhava । sthāpito bhava । sannidho bhava । sanniruddho bhava । sannihito bhava । avakuṇṭitho bhava । suprīto bhava । suprasanno bhava । sumukho bhava । varado bhava । prasīda prasīda ॥

स्वामिन् सर्व-जगनाथ (देवी सर्व-जगन्-नायिके) यावात् चन्द्रार्क-अवसानकम् ।
तावात् त्वं प्रीति भावेन कुम्भे/बिम्बेऽस्मिन् सन्निधिं कुरु ॥
svāmin sarva-jaganātha (devī sarva-jagan-nāyike) yāvāt candrārka-avasānakam ।
tāvāt tvaṁ prīti bhāvena kumbhe/bimbe'smin sannidhim kuru ॥

"O Lord of the entire universe (O Goddess, ruler of the entire universe), For as long as the sun and moon exist. May you, from love and affection remain present in this image."

- *Darpanam*
- *Dhūpam*
- *Dīpam*
- *Mahā Naivedyam*
- *Puṣpāñjali*
- *Karpura hārati*
- *Mantra puspam*

APPENDIX

AṢṬA-DIKPĀLA PŪJĀ & BHŪTA BALI

१. दैत्य दर्प विनाशाय सहस्राक्षाय धीमते । कुलशव्य ग्रहस्ताय नमस्तेऽस्तु शतक्रतो ॥
daitya darpa vināśāya sahasrākṣāya dhīmate ।
kulaśavya grahastāya namaste'stu śatakrato ॥ 1 ॥

Salutations to you, O Indra, the destroyer of the pride of demons, the thousand-eyed one, the wise, the protector of the lineage of the virtuous, and the performer of a hundred sacrifices.

ॐ इन्द्राय सुराधिपतये भगवत् पार्षदाय नमः । इन्द्र-पार्षदेभ्यो नमः ॥
oṁ indrāya surādhipataye bhagavat pārṣadāya namaḥ । indra-pārṣadebhyo namaḥ ॥

नमो भूतेभ्योऽरिष्ट-कृद्भ्यः सद्भ्योऽसद्भ्यः सद्-असद्भ्यः सर्व गणेभ्यो नमो नमः । साधारणः समुद्दिष्टे मन्त्रः सर्व दिश-स्वयम् । अमुना च बलिं दद्यात् पृथग्-आभ्याम् अनन्तरम् । पूर्वस्यां दिशि भगवतो ये गणाः वज्र-पाणयः श्वेताः श्वेताक्षाः श्वेत-लोहिता — दिव्यन्तरिक्ष-भौमाः पाताल तल वासिनः तेभ्यस्ताभ्यो नमो नमः स्वाहा ॥

namo bhūtebhyo'riṣṭa-kṛdbhyaḥ sadbhyo'sadbhyaḥ sad-asadbhyaḥ sarva gaṇebhyo namo namaḥ । sādhāraṇaḥ samuddiṣṭe mantraḥ sarva diśa-svayam । amunā ca baliṁ dadyāt pṛthag-ābhyām anantaram । pūrvasyāṁ diśi bhagavato ye gaṇāḥ vajra-pāṇayaḥ śvetāḥ śvetākṣāḥ śveta-lohitā — divyantarikṣa-bhaumāḥ pātāḷa taḷa vāsinaḥ tebhyas tābhyo namo namaḥ svāhā ॥

Salutations to all the beings, both those who cause harm and those who protect, the good and the bad, the existent and the non-existent. Salutations again and again to all the hosts of beings. This common mantra is offered in all directions. With this offering, one should present the oblation separately to each of the beings. In the eastern direction are the hosts of the Lord, who hold the thunderbolt, who are white, with white eyes, and white-red in color — residing in the heavens, the atmosphere, on earth, and in the lower realms (Pātāla). To those beings, salutations, salutations, Svāhā.

ये भूताः पुरः सदो निशाचरा रौद्राः सन्तोऽसन्तः सद्-असन्तो विरूपा विश्व-रूपा महा-रूपा घोर-रूपा मृगास्य विहग्-आननाः पुष्टि-कृतोऽपुष्टि-कृतः कामदाश्च बलिम् इच्छन्तस् तेषां बलिं हरामि महद्भ्यः क्षुद्रकेभ्यः सर्वेभ्यस् तेभ्यस् ताभ्यो नमो नमः ॥

ye bhūtāḥ puraḥ sado niśācarā raudrāḥ santo'santaḥ sad-asanto virūpā viśva-rūpā mahā-rūpā ghora-rūpā mṛgāsya vihag-ānanāḥ puṣṭi-kṛto'puṣṭi-kṛtaḥ kāmadāśca balim icchantas teṣāṁ baliṁ harāmi mahadbhyaḥ kṣudrakebhyas sarvebhyas tebhyas tābhyo namo namaḥ ॥

२. मुखम् यः सर्वे देवानाम् येन हव्य च नीयते । येन प्रवर्तते सर्वं नमस्तस्मै हविर्भुजे ॥
mukham yaḥ sarve devānām yena havya ca nīyate ।
yena pravartate sarvaṁ namas-tasmai havirbhuje ॥ 2 ॥

I salute you, O Lord of Fire, the mouth of all the gods, the one who conveys the oblations and by whom everything revolves.

ॐ अग्नये तेजोधिपतये भगवत् पार्षदाय नमः । अग्नि-पार्षदेभ्यो नमः ॥
oṁ agnaye tejodhipataye bhagavat pārṣadāya namaḥ । agni-pārṣadebhyo namaḥ ॥

नमो भूतेभ्यो ..... आग्नेयां दिशि भगवतो ये गणाः शक्ति-पाणयो रक्ता रक्ताक्षा रक्त-लोहिता — दिव्यन्तरिक्षम् ..... नमः स्वाहा ।
namo bhūtebhyo ..... āgneyāṁ diśi bhagavato ye gaṇāḥ śakti-pāṇayo raktā raktākṣā rakta-lohitā — divyantarikṣam ..... namaḥ svāhā ।

ये भूताः अग्नेय सदो ..... नमो नमः ॥ ye bhūtāḥ agneya sado ..... namo namaḥ ॥

३. येन संह्रीयते लोको येन धर्मश्च रक्ष्यते । यस्माद् बिभेति लोकोऽयम् प्रेत-नाथ नमो-स्तु ते ॥

yena saṁhrīyate loko yena dharmaśca rakṣyate ।
yasmād bibheti loko'yam preta-nātha namo-stu te ॥ 3 ॥

I salute you, O Lord of the Dead, the one who protects the Dharma, who terrifies the whole world, and by whom all is eventually taken.

ॐ यमाय धर्मराजाय भगवत् पार्षदाय नमः । यम-पार्षदेभ्यो नमः ॥
oṁ yamāya dharmarājāya bhagavat pārṣadāya namaḥ । yama-pārṣadebhyo namaḥ ॥

नमो भूतेभ्यो ……. याम्यायां दिशि भगवतो ये गणाः दण्ड-पाणयः कृष्णाः कृष्णाक्षाः कृष्ण-लोहिता — दिव्यन्तरिक्षम् ……. नमः ॥
namo bhūtebhyo ……. yāmyāyāṁ diśi bhagavato ye gaṇāḥ daṇḍa-pāṇayaḥ kṛṣṇāḥ kṛṣṇākṣāḥ kṛṣṇa-lohitā — divyantarikṣam ……. namaḥ ॥

ये भूताः दक्षिण सदो …… नमो नमः ॥ ye bhūtāḥ dakṣiṇa sado …… namo namaḥ ॥

४. राक्षसा यातुधानाश्च पिशाचाश्च श्रयन्ति यम् । तस्मै नैर्ऋति-रूपाय रक्षसां पतये नमः ॥
rākṣasā yātudhānāśca piśācāśca śrayanti yam ।
tasmai nirṛti-rūpāya rakṣasāṁ pataye namaḥ ॥ 4 ॥

I salute you, Wrathful Nairriti, Lord of the demons, in whom all the Rakshasas, Yatudhanas and Pisachas take their refuge.

ॐ नैर्ऋतये भूताधिपतये भगवत् पार्षदाय नमः । नैर्ऋति -पार्षदेभ्यो नमः ॥
oṁ nirṛtaye bhūtādhipataye bhagavat pārṣadāya namaḥ । nairṛti -pārṣadebhyo namaḥ ॥

नमो भूतेभ्यो ……. नैर्ऋत्यां दिशि भगवतो ये गणाः कड्ग-पाणयः श्यामा श्यामाक्षाः श्याम-लोहिता — दिव्यन्तरिक्षम् ……. नमः ॥
namo bhūtebhyo ……. nairṛtyāṁ diśi bhagavato ye gaṇāḥ kaḍga-pāṇayaḥ śyāmā śyāmākṣāḥ śyāma-lohitā — divyantarikṣam ……. namaḥ ॥

ये भूताः नैर्ऋते सदो …… नमो नमः ॥ ye bhūtāḥ nairṛte sado …… namo namaḥ ॥

५. येन संरक्ष्यते सर्वं यस्मिन्सर्वं प्रलीयते । अमोघ-पाश-हस्ताय तदपां पतये नमः ॥
yena saṁrakṣyate sarvaṁ yasmin sarvaṁ pralīyate ।
amogha-pāśa-hastāya tad apāṁ pataye namaḥ ॥ 5 ॥

I salute you, O Lord of the Waters, who carries the peerless noose, who sustains all life and into whom all is dissolved in the end.

वरुणाय जलाधिपतये भगवत् पार्षदाय नमः । वरुण-पार्षदेभ्यो नमः ॥
varuṇāya jalādhipataye bhagavat pārṣadāya namaḥ । varuṇa-pārṣadebhyo namaḥ ॥

नमो भूतेभ्योऽरिष्ट-कृद्भ्यः सद्भ्योऽसद्भ्यः सद्-असद्भ्यः सर्व गणेभ्यो नमो नमः । साधारणः समुद्दिष्टे मन्त्रः सर्व दिश-स्वयम् । अमुना च बलिं दद्यात् पृथग्-आभ्याम् अनन्तरम् । वारुण्यां दिशि भगवतो ये गणाः वज्र-पाणयः श्वेताः श्वेताक्षाः श्वेत-लोहिता — दिव्यन्तरिक्ष-भौमाः पाताल तल वासिनः तेभ्यस्ताभ्यो नमो नमः स्वाहा ॥

